# भाषासौरभम्

## अष्टमश्रेणी

## संस्कृतपाठ्यपुस्तकम्

LJ3IJ4

शिक्षक शिक्षा निदेशालय तथा राज्य शैक्षिक
अनुसंधान और प्रशिक्षण परिषद्,
ओड़िशा, भुवनेश्वरम्

ओड़िशा विद्यालय शिक्षा कार्यक्रम प्राधिकरण,
भुवनेश्वरम्

# भाषासौरभम्

**(अष्टमश्रेणी-संस्कृतपाठ्यपुस्तकम्)**

**ओडिशामाध्यमिकशिक्षापरिषदा अष्टमश्रेण्याः कृते अनुमोदितम्**


**सम्पादकमण्डली**

प्रफेसर पतितपावन वानार्जी
डक्टर ज्ञानरञ्जन पतिः
डक्टर कुमार चन्द्र मिश्रः

**सम्पादक समीक्षक मण्डली**

प्रफेसर गोपालकृष्ण दाशः
डक्टर कालीप्रसन्न शतपथी
डक्टर विपिन विहारी शतपथी
डक्टर गौतम महारणा
पण्डित नृसिंह चरण पण्डा
पण्डित भूपति भूषण मिश्रः

**संयोजिका**

डक्टर सविता साहु



**मुद्रण वर्षम्** - २०१९

**प्रस्तुति :**

शिक्षक शिक्षा निदेशालय तथा राज्य शैक्षिक अनुसंधान और प्रशिक्षणम् परिषद्
ओड़िशा, भुवनेश्वरम्
और
ओड़िशा राज्य पाठ्यपुस्तक प्रणयन और प्रकाशनम् संस्था, भुवनेश्वरम्

**मुद्रण :** पाठ्यपुस्तक उत्पादन और विक्रय, भुवनेश्वरम्

# अभिमतम्

राष्ट्रियपाठ्यचर्याप्रारूपम् (२००५), राज्यपाठ्यचर्याम् (२००७), शिशु शिक्षाधिकाराधिनियमम् (२००९), शिशूनां नि:शुक्लबाध्यतामूलकशिक्षाधिकारनियमम् (२०१०) अनसृत्य सर्वशिक्षाभियानकार्यक्रमानुसारं पाठ्यपुस्तकस्य प्रणयनमावश्यकमिति हेतो: विद्यार्थिनाम् उपयोगि पुस्तकं प्रस्तुतम् । विद्यार्थिनां विद्यालयजीवनेन सह परिवारेण समाजेन च सह व्यापकसम्बन्धस्थापनाय सर्वशिक्षाकार्यक्रम: कल्पित: । व्यावहारिकदृठ्या पाठ्यपुस्तकस्य विरचनस्य गुरुत्वम् अनुभूयते । 'घोषवन्तो बलवन्त' - इति रटनप्रकृत्ते: शिथिलीकरणं प्रवर्त्तनीयम् । मनस्तत्वदृष्ट्या छात्राणाम् अभिरुचिवर्द्धनं च दृश्यश्रव्याविधिमाध्यमेन करणीयम् । अयं प्रयास: राष्ट्रियशिक्षानीतिम् अनुसृत्य कृत: । राज्यशिक्षानीतौ अयम् अभिनव: प्रयोग: अभिनन्दनीय: ।

विद्यार्थिनाम् अभिरुचिवर्द्धनाय आचार्याणाम् अध्यापकानाम् च उद्यम: आवश्यक: । तेषां स्वकीयं ज्ञानम् अभिज्ञता प्रशिक्षणकौशलं कल्पनाशीलता च विद्यार्थिनां महते उपकाराय उपादानभूता: भविष्यन्ति । विद्यार्थिनां ज्ञानविकाशाय उपादेयप्रश्नमाध्यमेन शिक्षका: तेषाम् उत्साहान् वर्द्धयन्ति । तत्रापि निर्द्धारितं पाठ्यपुस्तकम् उपयोगिसाधनम् अस्ति । विद्यार्थिनां ज्ञानार्जनस्य सर्जनशक्ते: प्रायोगात्मकप्रबृत्ते: च साफल्याय शिक्षकाणां प्रशिक्षणप्रक्रियाया: प्रयोग-पद्धति: उपादेया भवति ।

विद्यालयस्य दैनिकार्यक्रमेण सह वार्षिककार्यक्रमस्य तथा निर्द्धारणं स्यात् येन पाठ्यक्रमस्य नियतकालशिक्षणस्य समन्वय: स्यात् । विषयाध्ययनानन्तरं मूल्याकंनं यथाविधि स्यात् येन छात्रस्य पाठ्यविषयान् प्रति अभिरुचि: वर्द्धेत । छात्रमनोविज्ञानस्य दृष्ट्या अनुकूलविषयज्ञानस्य समन्वयनिमित्तं प्रयत्न: विहित: । छात्राणां चिन्तनस्य प्रयोगस्य क्रियान्वयनस्य च अवसरप्रदानाय प्रस्तुति: कृता ।

पूर्वोक्तसर्वशिक्षाभियानानुकूलं पाठ्यपुस्तकविकाशक्रमे विशेषज्ञानाम् अध्यापकानां च सुचिन्तितं परामर्शं स्वागतीकरोमि ।

**निर्देशक:**

# शिक्षकान् प्रति

माननीयाः शिक्षकबान्धवाः !

कोमलमतीनां विद्यार्थिनांमध्ये संस्कृतस्य प्रचारः, संस्कृताध्ययनं प्रति आग्रहसृष्टिः, नैतिकमूल्यबोधस्य विकासः तथा च मातृभूमिं प्रति तेषां श्रद्धाजागरणम्-एतेषु विषयेषु भवादृशां विदुषाम् एव उत्तरदायित्वम् अस्ति । पुस्तकं केवलं भवतां सहायकमात्रम् । तथापि भवतां पाठ्यदानकर्मणि उत्साहवर्द्धनाय अभिनवपद्धत्या मनोविज्ञानदृष्ट्या च इदं 'भाषासौरभम्' सम्पाद्यते । अस्मिन् पुस्तके पाठ्यविषयः, अभ्यासप्रणाली दृष्टान्तमूलकं व्याकरणं च प्रदत्तानि ।

विषयमाध्यमेन शब्दरूपाणां धातुरूपाणां विभक्तीनां विशेष्यविशेषणानां तथा च अन्येषां सरलप्रयोगः पुस्तकेऽस्मिन् विद्यते । पुस्तकस्य विषयः सूचनात्मकः एव । भवन्तः अभ्यासद्वारा विद्यार्थिनां बुद्धेः विकासं कारयिष्यन्ति । प्रदत्तगीतानां सस्वरगानेन अभिनयेन च विद्यार्थिनः साग्रहं संस्कृताभिमुखाः भविष्यन्ति । रटनाभ्यासं विना प्रयोगाभ्यासेन संस्कृतस्य पाठनाय इदं ''भाषासौरभम्'' अवश्यं सहायकं भविष्यति इति आशा ।

पूर्वसम्पादितं विषयं क्रियाभित्तिकशैल्या सह सम्पाद्य भाषासौरभस्य इदं संस्करणं प्रस्तुतम् ।

''जयतु संस्कृतम्, जयतु भारतम् ।''

**सम्पादक - समीक्षक-मण्डली**



ଅଦ୍ୟାବଧି ଜଗତମାତାଙ୍କର ଚରଣରେ ମୁଁ ଯେଉଁଯେଉଁ ଭେଟି ଦେଉଅଛି, ସେଗୁଡ଼ିକ ମଧ୍ୟରେ ମୌଳିକ ଶିକ୍ଷା ମୋତେ ସବୁଠାରୁ ଅଧିକ କ୍ରାନ୍ତିକାରୀ ଓ ମହତ୍ତ୍ୱପୂର୍ଣ୍ଣ ମନେ ହେଉଛି । ଏହାଠାରୁ ଅଧିକ ମହତ୍ତ୍ୱପୂର୍ଣ୍ଣ ଓ ମୂଲ୍ୟବାନ ଭେଟି ମୁଁ ଯେ ଜଗତ ସମ୍ମୁଖରେ ଥୋଇପାରିବି, ତାହା ମୋର ପ୍ରତ୍ୟୟ ହେଉନାହିଁ । ଏଥିରେ ରହିଛି ମୋର ସମଗ୍ର ରଚନାତ୍ମକ କାର୍ଯ୍ୟକ୍ରମକୁ ପ୍ରୟୋଗାତ୍ମକ କରିବାର ଚାବିକାଠି । ଯେଉଁ ନୂଆ ଦୁନିଆ ପାଇଁ ମୁଁ ଛଟପଟ ହେଉଛି, ତାହା ଏହିଥିରୁ ହିଁ ଉଦ୍ଭବ ହୋଇପାରିବ । ଏହା ମୋର ଅନ୍ତିମ ଅଭିଳାଷ କହିଲେ ଚଳେ ।

**ମହାତ୍ମା ଗାନ୍ଧୀ**

# विषयक्रमः


| | | |
|---|---|---|
| 1. | वन्दनम् | 1 |
| 2. | संस्कृतसेविता भारतमाता (केवलं सुखपाठ्यनिमित्तम्) | 2 |
| 3. | परिवेशः | 3 |
| 4. | साधुः गोपालकृष्णः | 9 |
| 5. | जयी राजगुरुः | 13 |
| 6. | कृषकः | 17 |
| 7. | यत्नेन सिद्धिः | 26 |
| 8. | गन्धमादनः | 31 |
| 9. | इस्पात-नगरी | 37 |
| 10. | व्यासकविः फकीरमोहनः | 41 |
| 11. | राष्ट्रवन्दनम् | 46 |
| 12. | विचित्रा सृष्टिः | 49 |
| 13. | जीवनस्य रहस्यम् | 54 |
| 14. | सेवा हि परमो धर्मः | 58 |
| 15. | लक्ष्यप्राप्तिः | 63 |
| 16. | मातृभक्तः चाणक्यः | 67 |
| 17. | नीतिमञ्जरी | 72 |
| 18. | सूक्तयः | 77 |


●●●

# वन्दनम्

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ।।
समानो मन्त्रः समितिः समानी
समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः
समानेन वो हविषा जुहोमि ।।
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ।।

(संज्ञानसूक्तम्, ऋग्वेदः)

जनाः समाजे संगताः गच्छेयुः । परस्परं विरोधं विहाय एकविधम् एव वचनं वदेयुः । तेषां चित्ते समभावना सम्भवतु । सर्वे एकमताः तिष्ठेयुः ।

समाजे स्थितानां जनानां कार्याकार्यपर्यालोचनात्मकं गुप्तसम्भाषणम् एकरूपम् अस्तु । कार्येषु जनानां प्रवृत्तिः एकरूपा भवतु । प्रतिदिनं सर्वेषां कर्म अपि समानरूपं भवतु । समेषाम् अन्तःकरणं समानं भवेत् । एवं सर्वे सामाजिकाः भवन्तु । एवमेव सङ्कल्पैः सर्वेषां हृदयानि इन्द्रियाणि च समानरूपाणि यथा भवेयुः, तथा अस्माभिः प्रयत्नः करणीयः इति प्रार्थना ।



# संस्कृतसेविता भारतमाता

**डा: पि. वन्दोपाध्याय:**

वितरति हर्षं भारतवर्षम्
अस्माकं जननी,
किरीटमण्डिता सागरसेविता
धन्या तया धरणी ।।१।।

श्यामकेदारे सरित: तीरे
सलीलं मलयो वाति
मधुरं मधुरं कोकिलकूजनं
दूरात् दूरं याति ।।२।।

अतिप्राचीना नित्यनवीना
संस्कृतगङ्गाधारा,
ललितं ललितं चलति रुचिरं
सकलमङ्गलसारा ।।३।।

प्रज्ञाप्रकाशा संस्कृता भाषा
संहतिरक्षाशीला,
अतीव सरला कोमलतरला
भारतीकण्ठे माला ।।४।।

वेदं शास्त्रं शान्तिं शस्त्रं
कलयति बहु धीरम्,
संस्कृत-सेवित: भारतदेश:
जयतु जयतु चिरम् ।।५।।



# परिवेशः

भारती मनोजस्य **माता** । मनोजः प्रतिदिनं **मातरं** प्रणमति । एकदा मनोजः **मात्रा** सह नदीतटे भ्रमति स्म । तदा सः **मात्रे** निवेदयति - **मातः** ! कः नाम परिवेशः, कृपया वदतु । माता वदति - पुत्र! अस्मान् परितः यः दृश्यमानः अस्ति सः परिवेशः । भूमिः, जलं, गगनं, वायुः, वृक्षाः, जीवाः च विशेषतः परिवेशः इति परिचितः । पुत्रः पुनः पृच्छति - मातः ! केन भावेन सः दूषितः भवति ? माता वदति, गृहस्य अवकरद्वारा तथा च कृषिक्षेत्रे रासायनिकसारस्य प्रयोगद्वारा भूमिः दूषिता भवति । नगरस्य शिल्पागारस्य च वर्ज्यद्रव्यद्वारा जलं प्रदूषितं भवति । तैलचालितयानानां धूमद्वारा वायुः प्रदूषितः भवति । शिल्पागारस्थापनार्थम् अरण्यक्षेत्राणि विनष्टानि भवन्ति । वृक्षाणां छेदनं भवति । तेन वन्यजीवाः विनाशं गच्छन्ति । प्रतिदिनम् उत्तापस्य वृद्धिः भवति । आवश्यकसमये मेघाः न वर्षन्ति ।

पुत्रः **मातुः** सकाशात् परिवेशस्य प्रदूषणविषयं जानाति । सः पुनः मातरं पृच्छति - परिवेशः कथं सुरक्षितः भवेत् ? माता वदति - यदि वयं गृहस्य शिल्पागारस्य च अवकरान् इतस्ततः न क्षिपामः, निर्दिष्टे स्थाने स्थापयामः, वृक्षाणां रोपणं कुर्मः, अनावश्यकं वस्तु त्यजामः, तर्हि परिवेशः सुरक्षितः भवेत् । **मातुः** कथनेन पुत्रः सन्तुष्टः भवति । **मातरि** तस्य अधिकः विश्वासः अस्ति । अतः नूनम् अहं दश वृक्षान् रोपयामि, परिवेशस्य सुरक्षां च करोमि- इति सः शपथं नयति । माता आनन्देन पुत्रं मनोजम् आलिङ्गति ।

अतः वक्तुम् उचितम् - ''वृक्षः रक्षति रक्षितः ।''

| **परिवेशः, अवकरः, शिल्पागारः, प्रदूषणम्, वृक्षरोपणम्, सुरक्षा, रक्षितः ।** |
|---|

**कर्तृप्रदानि-**
मनोजः, माता, मेघाः
वायुः, पुत्रः



**क्रियापदानि-**
प्रणमति, भ्रमति,
पृच्छति, गच्छन्ति,
वर्षन्ति

LJV6P2

**शब्दार्थ :**

भ्रमति स्म - भ्रमणं कृतवान् (ବୁଲୁଥିଲା) ।

दूषित: - दोषयुक्त: (କଳୁଷିତ) ।

इतस्तत: - यथेच्छस्थाने (ଏଣେତେଣେ) ।

तर्हि - तत: (ତା'ହେଲେ) ।

नूनम् - निश्चयेन (ନିଶ୍ଚିତ ଭାବରେ) ।

आलिङ्गति - आलिङ्गनं करोति (ଆଲିଙ୍ଗନ କରୁଛନ୍ତି) ।

रक्षित: - रक्षां प्राप्त: (ସୁରକ୍ଷିତ) ।

परित: - चतु: पार्श्वे (ଚାରିପାଖରେ) ।

छेदनम् - कर्त्तनम् (କାଟିବା) ।

सकाशात् - समीपात् (ନିକଟରୁ) ।

त्यजाम: - त्यागं कुर्म: (ଫିଙ୍ଗୁ) ।

सन्तुष्ट: - तृप्त: (ତୃପ୍ତ ହେବା) ।

रोपयामि - रोपणं करोमि (ଲଗାଇବି) ।

वृक्ष:रक्षति रक्षित:- (ସୁରକ୍ଷିତବୃକ୍ଷ ରକ୍ଷାକରେ)

अवकरद्वारा - त्याज्यद्रव्यद्वारा (ଅଳିଆ ଆବର୍ଜନା ଦ୍ୱାରା) ।

वर्ज्यद्रव्यद्वारा - त्याज्यद्रव्यद्वारा (ଅଳିଆ ଆବର୍ଜନା ଦ୍ୱାରା) ।

आवश्यकसमये - उचितकाले (ଠିକ୍ ସମୟରେ) ।

## अभ्यास:

१. **एकपदेन उत्तरं कुरुत - (ଏକପଦରେ ଉତ୍ତର ଲେଖ)**

(क) मनोज: प्रतिदिनं कां प्रणमति ?

(ख) कया सह मनोज: नदीतटे भ्रमति स्म ?

(ग) अस्मान् परित: क: दृश्यमान: अस्ति ?

(घ) रासायनिकसारस्य प्रयोगद्वारा का दूषिता भवति ?

(ङ) तैलचालितयानानां धूमद्वारा क: प्रदूषित: भवति ?

(च) कथम् अरण्यक्षेत्राणि विनष्टानि भवन्ति ?

(छ) मातु: सकाशात् क: प्रदूषणविषयं जानाति ?

(ज) कुत्र पुत्रस्य अधिक: विश्वास: अस्ति ?

(झ) कति वृक्षान् रोपयामि इति पुत्र: शपथं नयति ?

(परिवेश:, मातरि, मातरम्, भूमि:, मात्रा, वायु:, दश, पुत्र:, शिल्पागारस्थापनार्थम्)

२. **शून्यस्थानं पूरयत - (ଶୂନ୍ୟସ୍ଥାନପୂରଣ କର)**

(क) ___________ कः नाम परिवेशः ?

(ख) मातः ! केन भावेन सः ___________ भवति ?

(ग) शिल्पागारस्थापनार्थम् ___________ विनष्टानि भवन्ति ।

(घ) तेन वन्यजीवाः ___________ भवन्ति ।

(ङ) प्रतिदिनम् ___________ वृद्धिः भवति ।

(च) ___________ प्रदूषणविषयं पुत्रः मातुः सकाशात् जानाति ।

(छ) ___________ रोपणं कुर्मः ।

(ज) तर्हि परिवेशः ___________ भवेत् ।

(झ) ___________ कथनेन पुत्रः तृप्तः भवति ?

(ञ) ___________ तस्य अधिकः विश्वासः अस्ति ।

**(मातुः, मातः !, उत्तापस्य, मातरि, सुरक्षितः, दूषितः,**

**विनष्टाः, अरण्यक्षेत्राणि, परिवेशस्य, वृक्षाणाम्)**

३. **मातृभाषया अनुवादं कुरुत - (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)**

(क) कृषिक्षेत्रे रासायनिकसारस्य प्रयोगद्वारा भूमिः दूषिता भवति ।

(ख) तैलचालितयानानां धूमद्वारा वायुः प्रदूषितः भवति ।

(ग) तेन वन्यजीवाः विनष्टाः भवन्ति ।

(घ) परिवेशस्य प्रदूषणविषयं पुत्रः मातुः सकाशात् जानाति ।

(ङ) अनावश्यकं वस्तु त्यजामः ।

(च) मातुः कथनेन पुत्रः सन्तुष्टः भवति ।

(छ) मातरि तस्य अधिकः विश्वासः अस्ति ।

(ज) अतः नूनम् अहं दश वृक्षान् रोपयामि ।

(झ) माता सानन्दं पुत्रं मनोजम् आलिङ्गति ।

(ञ) अतः वक्तुम् उचितम् - ''वृक्षः रक्षति रक्षितः ।''

४. **शुद्धपदं लिखत - (ଶୁଦ୍ଧପଦ ଲେଖ)**

यथा - शः वे रि प = परिवेशः

(१) प्र ति ण म = ....................    (२) षि दू तः = ....................

(३) जी वाः व न्य = ....................    (४) प उ त्ता स्य = ....................

(५) सु क्षि र तः = ....................    (६) अ क व रा न् = ....................

५. **स्तम्भमेलनं कुरुत - (ସ୍ତମ୍ଭ ମିଳାଅ)**

| क | ख |
|---|---|
| केन | वायुः |
| सः | छेदनम् |
| धूमद्वारा | रूपेण |
| वृक्षाणां | परिवेशः |
| उत्तापस्य | सन्तुष्टः |
| पुत्रः | वृद्धिः |

६. **उचितपदेन शून्यस्थानं पूरयत - (ଉଚିତପଦବାଛି ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର)**

(क) एषा मनोजस्य ............... । (मात्रा, मातुः, माता)

(ख) सः ............... निवेदयति । (मात्रे, मातुः, मातरं)

(ग) .............. केन भावेन सः दूषितः भवति ? (माता, मातः !, मातरं)

(घ) पुत्रः ................. सकाशात् जानाति । (मात्रा, मातुः, मातरम्)

(ङ) ................ तस्य अधिकः विश्वासः अस्ति । (मातरि, मातुः, मात्रे)

७. **रेखाङ्कितपदस्य संशोधनं कुरुत-(ରେଖାଙ୍କିତପଦକୁ ଠିକ୍‌କର)**

(क) मनोजःमातरं प्रणमन्ति।

(ख) पुत्राः पुनः पृच्छति।

(ग) वन्यजीवाः विनाशं गच्छति।

(घ) सः शपथः नयति।

(ङ) वृक्षं रक्षति रक्षितः।

८.    **वाक्यानि रचयत (ବାକ୍ୟରଚନା କର)**

भ्रमति, भवति, नयति, रक्षति, वदति।

## तव कृते करणीयम्-(ତୁମପାଇଁ କାମ)

**पठत, लिखत च** -(ପଢ଼ ଓ ଲେଖ)

**प्रथमा विभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | माता | मातरौ | मातरः |
| दुहितृ | दुहिता | .............. | .............. |
| स्वसृ | स्वसा | स्वसारौ | स्वसारः |

**द्वितीया विभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मातरम् | मातरौ | मातॄः |
| दुहितृ | .............. | दुहितरौ | .............. |
| स्वसृ | स्वसारम् | स्वसारौ | स्वसॄः |

**तृतीया विभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मात्रा | मातृभ्याम् | मातृभिः |
| दुहितृ | दुहित्रा | .............. | .............. |
| स्वसृ | स्वस्रा | स्वसृभ्याम् | .............. |

**चतुर्थी विभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मात्रे | मातृभ्याम् | मातृभ्यः |
| दुहितृ | .............. | .............. | दुहितृभ्यः |
| स्वसृ | स्वस्रे | .............. | स्वसृभ्यः |

**पञ्चमी विभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मातुः | मातृभ्याम् | मातृभ्यः |
| दुहितृ | दुहितुः | .............. | .............. |
| स्वसृ | स्वसुः | .............. | स्वसृभ्यः |

**षष्ठी विभक्ति:**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मातु: | मात्रो: | मातृणाम् |
| दुहितृ | .............. | दुहित्रो: | .............. |
| स्वसृ | स्वसु: | स्वस्रो: | .............. |

**सप्तमी विभक्ति:**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मातरि | मात्रो: | मातृषु |
| दुहितृ | .............. | .............. | दुहितृषु |
| स्वसृ | स्वसरि | .............. | स्वसृषु |

**सम्बोधने**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मात:! | मातरौ! | मातर:! |
| दुहितृ | .............. | .............. | दुहितर:! |
| स्वसृ | स्वस:! | .............. | स्वसार:! |

मातृ - ମା, दुहितृ - ଝିଅ, स्वसृ - ଭଉଣୀ

●

# साधुः गोपालकृष्णः

LK52QP



स्वाधीनतायाः पूर्वघटना । एकस्मिन् विद्यालये बहवः छात्राः पठन्ति स्म । एकदा शिक्षकः छात्राणां परीक्षां कर्तुं चिन्तितवान् । सः छात्रान् पृष्टवान् - 'प्रियशिष्याः ! **यूयं** परीक्षार्थं प्रस्तुताः ?' छात्राः प्रस्तुताः इति कथितवन्तः । शिक्षकः सूचितवान् - ''**यूयं** सर्वे परीक्षापुस्तिकां लेखनीं च उन्मोचयत'' ।

छात्राः परीक्षापुस्तिकां लेखनीं च उन्मोचितवन्तः । शिक्षकः कृष्णफलके प्रश्नान् लिखितवान् । छात्राः उत्तराणि लिखित्वा दर्शितवन्तः। तेषु गोपालकृष्णगोखले अपि आसीत् । शिक्षकः उत्तराणां मूल्याङ्कनं **कृत्वा** गोपालकृष्णम् आहूतवान् - ''अरे गोपाल ! **त्वम् अत्र** आगच्छ।'' गोपालः शिक्षकस्य समीपं गतवान् । शिक्षकः कथितवान्- ''अरे ! **त्वया** तु **सम्यक्** लिखितम् । **त्वत्** अधिकम् कोऽपि न लिखितवान् । अतः **तुभ्यम्** एकं पुरस्कारं दातुम् इच्छामि । भो : छात्राः ! **युष्मासु** एषः गोपालः श्रेष्ठः । एषः परीक्षायां सम्यक् लिखितवान् ।''

शिक्षकस्य वचनं श्रुत्वा गोपालस्य मुखं म्लानम् अभवत् । तत् दृष्ट्वा शिक्षकः पृष्टवान् - 'अरे गोपाल ! **तव** मुखं किमर्थं म्लानं दृश्यते ?' गोपालः कथितवान् - ''गुरुदेव ! पुरस्कारं **प्राप्तुम्** अहम् अयोग्यः । परीक्षायाम् अहं मित्रस्य साहाय्यं नीतवान् । अहम् **अतीव** लज्जितः । अहं दण्डनीयः ।'' इति कथयन् सः **उच्चैः** क्रन्दितवान् । तस्य क्रन्दनं श्रुत्वा छात्राः अपि क्रन्दितवन्तः ।

एतादृशेन सत्यवचनेन शिक्षकः सन्तुष्टः । सः गोपालम् आलिङ्ग्य कथितवान् - 'साधु बालक! साधु। एषः पुरस्कारः **तव** एव । **तव** सत्यनिष्ठायाः कृते एषः दीयते । **त्वं** सत्यवादी । अतः अहं **त्वयि** अतीव स्निह्यामि । आगामिकाले त्वं भारतस्य महान् सेवकः भविष्यसि । सर्वे चिरकालं **त्वां** स्मरिष्यन्ति ।

**कर्तुम्, उन्मोचयत, कृष्णफलकम्, सम्यक्,**
**म्लानम्, प्रतारितवान्, दृष्ट्वा, तव, त्वाम् ।**

**कर्तृपदानि-** शिक्षकः, छात्राः, अहम्, सर्वे, सेवकः।

**क्रियापदानि-** इच्छामि, शिक्षामि, भविष्यसि, स्मरिष्यन्ति, आगच्छ।

**शब्दार्थ :**

चिन्तितवान् - चिन्तनं कृतवान् (ଭାବିଲା) ।
दर्शितवन्तः - प्रदर्शनं कृतवन्तः (ଦେଖାଇଲେ) ।
पृष्टवान् - प्रश्नं कृतवान् (ପଚାରିଲା) ।
मूल्याङ्कनम् - अङ्कप्रदानम् (ନମ୍ବର ଦେବା) ।
सूचितवान् - सूचनां दत्तवान् (ସୂଚନା ଦେଲେ) ।
सम्यक् - समीचीनम् (ଠିକ୍) ।
उन्मोचयत - उद्घाटयत (ଖୋଲ) ।
आलिङ्ग्य - आलिङ्गनं कृत्वा (କୁଣ୍ଢାଇ) ।
कृष्णफलके - श्यामपटे (କଳାପଟାରେ) ।
परीक्षापुस्तिकाम् - परीक्षाखातिकाम् (ପରୀକ୍ଷା ଖାତାକୁ) ।

## अभ्यास :

१. **एकपदेन उत्तरं कुरुत -** (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)

(क) कः परीक्षां कर्त्तुं चिन्तितवान् ?

(ख) छात्राः किं लिखित्वा दर्शितवन्तः ?

(ग) शिक्षकः कृष्णफलके कान् लिखितवान् ?

(घ) गोपालः कस्य समीपं गतवान् ?

(ङ) गोपालस्य मुखं किम् अभवत् ?

(च) केन शिक्षकः सन्तुष्टः ?

(प्रश्नान्, शिक्षकः, म्लानम्, उत्तराणि, सत्यवचनेन, शिक्षकस्य)

२. **शून्यस्थानं पूरयत -** (ଶୂନ୍ୟସ୍ଥାନପୂରଣ କର)

(क) ................. परीक्षार्थं प्रस्तुताः ?

(ख) ............... अत्र आगच्छ ।

(ग) .............. तु सम्यक् लिखितम् ।

(घ) ................. एकं पुरस्कारं दातुम् इच्छामि ।

(ङ) ............... एषः गोपालः श्रेष्ठः ।

(च) अरे गोपाल ! ................ मुखं किमर्थं म्लानं दृश्यते ?

(छ) एषः पुरस्कारः ................. एव ।

(ज) अतः अहं ................ अतीव स्निह्यामि ।

(त्वम्, तुभ्यम्, तव, यूयम्, त्वया, युष्मासु, त्वयि, तव)

३. **मातृभाषया अनुवादं कुरुत -** (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

(क) प्रियशिष्याः ! यूयं परीक्षार्थं प्रस्तुताः ?

(ख) अरे गोपाल ! त्वम् अत्र आगच्छ ।

(ग) तुभ्यम् एकं पुरस्कारं दातुम् इच्छामि ।

(घ) एषः परीक्षायां सम्यक् लिखितवान् ।

(ङ) तव मुखं किमर्थं म्लानं दृश्यते ।

(च) अतः अहं त्वयि अतीव स्निह्यामि ।

(छ) सर्वे चिरकालं त्वां स्मरिष्यन्ति ।

४. **शुद्धपदं रचयत -** (ଶୁଦ୍ଧପଦ ଲେଖ)

उदाहरणम् - कः ल बा - बालकः

| | | | | | |
|---|---|---|---|---|---|
| (१) | ल वि ये द्या | ...................... | (२) | न् वा चि त न्ति | ...................... |
| (३) | थि क व त न्तः | ...................... | (४) | द्घा उ य ट त | ...................... |
| (५) | णि उ त्त रा | ...................... | (६) | कृ गो ल ष्णः पा | ...................... |

५. **विषयानुसारं स्तम्भमेलनं कुरुत -** (ବିଷୟ ଅନୁଯାୟୀ ସ୍ତମ୍ଭ ମିଳାଅ)

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| बहवः | प्रस्तुताः |
| छात्राः | छात्राः |
| गोपालस्य | दातुम् इच्छामि |
| त्वयि | मुखम् |
| तुभ्यम् | स्निह्यामि |

६. **रेखाङ्कितपदस्य संशोधनं कुरुत** -(ରେଖାଙ୍କିତ ପଦକୁ ଠିକ୍ କର)

(क) यूयं परीक्षार्थं <u>प्रस्तुतः</u>।

(ख) त्वम् अत्र <u>आगच्छतु</u>।

(ग) <u>युष्माभिः</u> गोपालः श्रेष्ठः।

(घ) <u>तव</u> अतीव स्निह्यामि।

(ङ) सर्वे <u>त्वं</u> स्मरिष्यन्ति।

७. वाक्यानि रचयत- (ବାକ୍ୟଗଠନ କର)

पठन्ति स्म, गतवान्, लिखितवान्, अहम्, तव।

८. सन्धिविच्छेदं कुरुत- (ସନ୍ଧିବିଚ୍ଛେଦ କର)

परीक्षार्थम्, कोऽपि, पुरस्कारम्, किमर्थम्, मूल्याङ्कनम्, अतीव, इतस्ततः

## तव कृते करणीयम् (ତୁମପାଇଁକାମ)

**उच्चैः पठत, लिखत च-** (ବଡ଼ପାଟିରେ ପଢ଼ ଏବଂ ଲେଖ) **'युष्मद्' शब्दः**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

**उचितपदेन शून्यस्थानं पूरयत -** (ଉଚିତପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) अहं ................ एकं विषयं वदिष्यामि । (त्वम्, त्वाम्, यूयम्)

(ख) ............... सर्वे उत्तमाः बालकाः । (त्वम्, युवाम्, यूयम्)

(ग) अहं .............. एकां कथां कथयामि । (यूयम्, त्वया, युष्मान्)

(घ) शिक्षकः ............... पाठं ददाति । (तुभ्यम्, त्वत्, त्वम्,)

(ङ) ................ विद्यालयस्य नाम किम् ? (त्वयि, त्वाम्,, तव)

(च) शिक्षकः ................. विश्वासं करोति । (त्वयि, त्वाम्,, तव)

(छ) ..................... कः श्रेष्ठः ? (यूयम्, युष्माभिः, युष्मासु)

(ज) .................. तत्र गच्छतम् । (युवाम्, यूयम्, त्वम्)

(झ) ................. गृहं कुत्र ? (युष्माभिः, यूयम्, युष्माकम्)

(ञ) ................ किं बालेश्वरं गमिष्यथ ? (यूयम्, युष्मान्, युवाम्)

●

# जयी राजगुरुः

LKDXSC



भारतवर्षम् **अस्माकं** देशः । एषः देशः अस्माकं मातृभूमिः । **वयं** सर्वे अस्य दायादाः । **अस्माभिः** एषा मातृरूपेण पूज्यते । वैदेशिकाः बहुवारम् अस्याः उपरि आक्रमणं कृतवन्तः । आङ्ग्लजनाः वाणिज्यं कर्त्तुम् अत्र आगतवन्तः । क्रमशः अत्र स्थित्वा **अस्मान्** शासितवन्तः । तेषां शासनेन भारतीयाः अकथनीयं दुःखं प्राप्तवन्तः । भारतं तेषां शासनात् मोचयितुं बहवः नेतारः अग्रे आगताः । ते **अस्मभ्यम्** उद्बोधनं दत्तवन्तः ।

तदानीं खोर्धाराज्यस्य राजा आसीत् ठक्कुरराजः मुकुन्ददेवः । तस्य मन्त्री आसीत् जयी राजगुरुः । सः राजपरिवारस्य पारम्परिकः गुरुः । आङ्ग्लशासनस्य विरोधेन १८१७तमे वर्षे महान् प्रजासंग्रामः अभवत् । तस्य संग्रामस्य मुख्यभूमिकां नीतवान् जयी राजगुरुः । तस्य भाषणं शाणितम् अस्त्रम् इव आसीत् । तस्य आह्वानेन पाइकजातिः मिलिता । सर्वे मिलित्वा आङ्ग्लशासकानां प्रतिरोधं कृतवन्तः ।

वणिजः आङ्ग्लजनाः अतीव चतुराः । ते गुप्तपथेन निशार्धे दुर्गं प्रविष्टाः । कौशलेन राजगुरुं निगृहीतवन्तः । ततः बहुदूरं बालेश्वरं तं नीतवन्तः । ततः मेदिनीपुरस्य बाघतोटा इति स्थाने तस्य विचारः अभवत् । एकस्य वटवृक्षस्य शाखाभ्यां तस्य बन्धनं कृतवन्तः । सः जीवनं त्यक्तवान्, किन्तु आङ्ग्लशासकानां वश्यतां न स्वीकृतवान् । तस्य मरणात्परं बहवः राजगुरुसदृशाः स्वाधीनतासैनिकाः उत्पन्नाः । किन्तु राजगुरोः देशप्रेम इतिहासे स्वर्णाक्षरैः लिपिबद्धम् अभवत् । तस्य त्यागबलेन उत्कलजननी धन्या अभवत् । **वयम्** अपि तस्य मार्गम् अनुसृत्य देशस्य रक्षां करिष्यामः । अतः उद्घोषयामः -

*मातृभूमिः भारतम् । **मम** शिक्षा देशरक्षा । **मम** दीक्षा मातुः रक्षा ।*

*दायादाः, शाणितम्, दुर्गम्, अनुसृत्य, दीक्षा ।*

**कर्तृपदानि-** मातृभूमिः, वैदेशिकाः, नेतारः, गुरुः, वणिजः।

**क्रियापदानि-** करिष्यामः, अभवत्, आसीत्।

**शब्दार्थ :**

दायादा: - सन्ताना: (ସନ୍ତାନ) ।

उद्बोधनम् - प्रबोधनम् (ବୁଝାଇବା) ।

ठक्कुरराज: - ठाकुरराजा इति भाषायाम् (ଠାକୁର ରାଜା) ।

शाणितम् - तीक्ष्णम् (ଧାରୁଆ) ।

अनुसृत्य - अनुसरणं कृत्वा (ପଛେ ପଛେ ଯାଇ) ।

निगृहीतवन्त: - बन्धने नीतवन्त: (ବାନ୍ଧି ପକାଇଲେ) ।

१८१७ तमे- सप्तदशाधिक-अष्टादशशततमे (୧୮୧୭ ତମ)

## अभ्यास :

१. **शून्यस्थानं पूरयत - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର)**

(क) ................. सर्वे अस्या: दायादा: ।

(ख) ते ................. उद्बोधनं दत्तवन्त: ।

(ग) तस्य मन्त्री आसीत् .............. ।

(घ) तस्य आह्वानेन ................. मिलिता ।

(ङ) ................. राजगुरुं निगृहीतवन्त: ।

(च) तस्य त्यागबलेन ................. धन्या अभवत् ।

(कौशलेन, अस्मभ्यम्, वयम्, पाइकजाति:, जयी राजगुरु:, उत्कलजननी)

२. **एकपदेन उत्तरं लिखत - (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)**

(क) के वाणिज्यं कर्त्तुम् अत्र आगतवन्त: ?

(ख) मुकुन्ददेव: कस्य राज्यस्य राजा आसीत् ?

(ग) मुकुन्ददेवस्य मन्त्री क: आसीत् ?

(घ) राजगुरो: आह्वानेन का मिलिता ?

(ङ) कौशलेन राजगुरुं किं कृतवन्त: ?

(च) मम शिक्षा का ?

(खोर्धा, देशरक्षा, आङ्गलजना:, जयी राजगुरु:, निगृहीतवन्त: पाइकजाति:)

३. **मातृभाषया अनुवादं कुरुत - (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)**

(क) भारतवर्षम् अस्माकं देश: ।

(ख) वयं सर्वे अस्या: दायादा: ।

(ग) वणिज: आङ्ग्लजना: अतीव चतुरा: ।

(घ) कौशलेन राजगुरुं निगृहीतवन्त: ।

(ङ) तत: बहुदूरं बालेश्वरं तं नीतवन्त: ।

४. **शुद्धपदं रचयत - (ଶୁଦ୍ଧପଦ ଲେଖ)**

*उदाहरणम् - न का र णे - कारणेन*

| | | | | | |
|---|---|---|---|---|---|
| (१) | व त् भ अ | ...................... | (२) | क्र आ म म् ण | ...................... |
| (३) | णि ज: व | ...................... | (४) | न नी ज | ...................... |
| (५) | गु रा ज रु म् | ...................... | (६) | ध म् प्र रो ति | ...................... |

५. **विषयानुसारं स्तम्भमेलनं कुरुत - (ସ୍ତମ୍ଭ ମିଳାଅ)**

| **'क' स्तम्भ:** | **'ख' स्तम्भ:** |
|---|---|
| वयं | नेतार: |
| बहव: | चतुरा: |
| आङ्ग्लजना: | सर्वे |
| राजगुरो: | वटवृक्षस्य |
| एकस्य | देशप्रेम |

६. **रेखाङ्कितपदस्य संशोधनं कुरुत - (ରେଖାଙ୍କିତ ପଦକୁ ଠିକ୍ କର)**

(क) भारतवर्षम् अस्माकं देशम् ।

(ख) अस्मान् एषा मातृरूपेण पूज्यते ।

(ग) ते अस्मान् उद्बोधनं दत्तवन्त: ।

(घ) मया शिक्षा देशरक्षा ।

(ङ) मम दीक्षा माता रक्षा ।

७. **वाक्यानि रचयत- (ବାକ୍ୟରଚନା କର)**

अस्माकम्, वयम्, मम, भारतम्, अभवत्

८. **सन्धिविच्छेदं कुरुत- (ସନ୍ଧିବିଚ୍ଛେଦ କର)**

मरणात्परम्, स्वर्णाक्षरै:, निशार्धे।

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)

**उच्चैः पठत, लिखत च-** (ବଡ଼ପାଟିରେ ପଢ଼ ଓ ଲେଖ) **'अस्मद्' शब्दः**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

**बन्धनीमध्यस्थ-यथार्थपदैः शून्यस्थानानि पूरयत - (ବନ୍ଧନୀମଧ୍ୟରୁ ଉଚିତପଦବାଛି ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର)**

(क) ................. त्वां वदिष्यामि । (अहम्, आवाम्, वयम्)

(ख) ............... सर्वे उत्तमाः छात्राः । (अहम्, आवाम्, वयम्)

(ग) रामः .............. एकां लेखनीं नयति । (मत्, मम, मयि)

(घ) शिक्षकः ............... पाठं ददाति । (मह्यम्, मया, माम्)

(ङ) ................ विद्यालयस्य नाम किम् ? (मयि, मम, मत्)

(च) शिक्षकः ................. विश्वासं करोति । (मयि, माम्, मम)

(छ) ..................... कः श्रेष्ठः ? (वयम्, अस्माभिः, अस्मासु)

(ज) ................... तत्र गच्छावः । (आवाम्, अहम्, वयम्)

(झ) ................. गृहं कुत्र ? (अस्माभिः, वयम्, अस्माकम्)

(ञ) ................ किं बालेश्वरं गमिष्यामः । (अस्मान्, वयम्, आवाम्)

●

# कृषक:

**एष:** ओडिशाप्रदेश: । शस्यश्यामलक्षेत्राणां सौन्दर्यम् **एतं** प्रदेशं मण्डयति । **एतस्या:** श्यामलताया: मूलं कृषकस्य श्रम: एव । प्रायत: प्रतिशतम् अशीति: जना: कृषिद्वारा जीवन्ति । बहव: नद्य: **अस्मिन्** प्रदेशे प्रवहन्ति । नदी-प्रवाहात् **एतस्या:** भूमि: उर्वरा । कृषक: हलेन भूमिं कर्षति । **एतेन** भूमि: उत्पादनयोग्या भवति । हलं नाम लाङ्गलम् । **एतस्मात्** कृषिक्षेत्रात् धान्य-मुद्ग-माष-कुल्माष-भूचणकादीनि शस्यानि उत्पादितानि भवन्ति । धान्यम् **एतस्य** प्रदेशस्य प्रधानम् उत्पादनम् । अक्षयतृतीयात: **एतस्मिन्** प्रदेशे कृषिकार्यस्य प्रारम्भ: भवति । कृषक: रौद्रतापस्य सहनं करोति । **एष**: श्रावणस्य वृष्टिद्वारा सिक्त: सन् कृषिकार्यं सम्पादयति । शीतकाले आलुक-वार्ताक-पलाण्डु-लसुन-हरित-मूलक-रक्तवार्ताक-शाकादिभि: क्षेत्रं रमणीयं भवति । कृषक: स्वयं कष्टं करोति । पण्यद्रव्याणि विपणीम् आनयति । एतै: पण्यै: अस्माकं भोजनव्यवस्था रुचिकरी भवति । अत: **एतस्मै** कृषकाय नम: ।

**''जयतु कृषक: । जयतु सैनिक: ।**

| **मण्डयति, उर्वरा, कुल्माष:, सिक्त:, वार्ताकम्, विपणीम्, पण्यै:** |
|---|



**कर्तृपदानि-** जना:, नद्य:, शस्यानि, कृषक:, धान्यम्।

**क्रियापदानि-** मण्डयति, जीवन्ति, प्रवहन्ति, कर्षति, संपादयति।

**शब्दार्थ :**

मण्डयति - मण्डनं करोति / भूषितं करोति (ମଣ୍ଡନ କରେ) ।

बहवः - बहुसंख्याकाः (बहु-शब्दस्य स्त्रीलिङ्गे धेनुवत् रूपम्)(ବହୁତ) ।

कर्षति - कर्षणं करोति (ଚାଷ କରେ) ।

माषः - व्रीहिः - बिरि इति भाषायाम् (ବିରି) ।

भूचणकः - बादाम इति भाषायाम् (ବାଦାମ) ।

सन् - भवन् (ହୋଇ) ।

कुल्माषः - यावकः (କୋଳଥ) ।

सिक्तः - जलार्दितः (ଓଦା) ।

हरितम् - बन्धाकोवि इति भाषायाम् (ବନ୍ଧାକୋବି) ।

वार्ताकम् - बाइगण इति भाषायाम् (ବାଇଗଣ)

पलाण्डु - पिआज इति भाषायाम् (ପିଆଜ)

मूलकम् - मूला इति भाषायाम् (ମୂଳା)

रक्तवार्ताकम् - टमाटो इति भाषायाम् (ବିଲାତିବାଇଗଣ)

## अभ्यासः

१. **एकपदेन उत्तरं कुरुत -** (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଦିଅ)

(क) कृषकस्य श्रमः कस्याः मूलाम्?

(ख) कृषकः केन भूमिं कर्षति ?

(ग) कदा कृषिकार्यस्य आरम्भः भवति ?

(घ) कैः क्षेत्रं रमणीयं भवति ?

(ङ) कस्मै नमः?

(हलेन, कृषकाय, श्यामलतायाः, अक्षयतृतीयातः, शाकादिभिः)

२. **शून्यस्थानं पूरयत -** (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) ............... ओडिशाप्रदेशः ।

(ख) हलं नाम ............... ।

(ग) कृषकः ............... कष्टं करोति ।

(घ) पण्यद्रव्याणि ............... आनयति ।

(ङ) अतः ............... कृषकाय नमः ।

**(एषः, एतस्मै, विपणीम्, लाङ्गलम्, स्वयम्)**

३. **मातृभाषया अनुवादं कुरुत -** (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

(क) बहवः नद्यः अस्मिन् प्रदेशे प्रवहन्ति ।

(ख) नदी-प्रवाहात् एतस्याः भूमिः उर्वरा ।

(ग) शाकादिभिः क्षेत्रं रमणीयं भवति ।

(घ) पण्यद्रव्याणि विपणीम् आनयति ।

(ङ) अतः एतस्मै कृषकाय नमः ।

(च) जयतु कृषकः । जयतु सैनिकः ।

४. **शुद्धपदं रचयत -** (ଶୁଦ୍ଧପଦ ଲେଖ)

*उदाहरणम् - ता श्या म ल याः - श्यामलतायाः ।*

| | | | |
|---|---|---|---|
| (१) प्र शे दे | ...................... | (२) भू ण च कः | ...................... |
| (३) प्र न धा म् | ...................... | (४) का ले शी त | ...................... |
| (५) श्रा ण व स्य | ...................... | (६) वि णी प म् | ...................... |

५. **स्तम्भमेलनं कुरुत -** (ସ୍ତମ୍ଭ ମିଳାଅ)

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| कृषकस्य | प्रदेशम् |
| एतं | श्रमः |
| भूमिः | पण्यैः |
| हलं | लाङ्गलम् |
| एतैः | उर्वरा |

६. रेखाङ्कितपदस्य संशोधनं कुरुत (ରେଖାଙ୍କିତ ପଦକୁ ଠିକ୍ କର)

(क) भोजनव्यवस्था <u>रुचिकरा</u> भवति।

(ख) एतस्मै <u>कृषकं</u> नमः।

(ग) <u>एषा</u> ओडिशाप्रदेशः।

(घ) बहुनि नद्यः प्रवहन्ति।

(ङ) कृषकः स्वयं कष्टं कुर्वन्ति।

७. वाक्यानि रचयत (ବାକ୍ୟ ରଚନା କର)

आनयति, नमः, करोति, भवति, जनाः।

८. सन्धिविच्छेदं कुरुत (ସନ୍ଧିବିଚ୍ଛେଦ କର) - चणकादीनि, प्रारम्भः, शाकादिमिः

## तव कृते करणीयम् (ତୁମ ପାଇଁ କାମ)

**पश्यत, उच्चैः पठत -** (ଦେଖ, ପାଟିକରି ପଢ଼)

**'एतद्' शब्दस्य पुंलिङ्गे -** **प्रथमाविभक्तिः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| **एषः** गजः | **एतौ** गजौ | **एते** गजाः |
|  |  |  |

**शून्यस्थानानि पूरयत -** (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

| | | | |
|---|---|---|---|
| तद् | सः | तौ | ते |
| यद् | यः | यौ | ............. |
| किम् | कः | ............. | के |
| सर्व | सर्वः | सर्वौ | सर्वे |
| इदम् | अयम् | इमौ | इमे |

**'एतद्' शब्दस्य पुंलिङ्गे -** **द्वितीयाविभक्तिः**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|
| एतम् | एतौ | एतान् |

| | | | |
|---|---|---|---|
| तद् | तम् | तौ | ............. |
| यद् | यम् | ............. | यान् |
| किम् | ............. | कौ | कान् |
| सर्व | सर्वम् | सर्वौ | ............. |
| इदम् | इमम् | इमौ | ............. |

**'एतद्' शब्दस्य पुंलिङ्गे -** **तृतीयाविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतेन | एताभ्याम् | एतैः |
| तद् | तेन | ताभ्याम् | .............. |
| यद् | ............. | याभ्याम् | यैः |
| किम् | केन | .............. | कैः |
| सर्व | सर्वेण | सर्वाभ्याम् | ............. |
| इदम् | अनेन | आभ्याम् | एभिः |

**'एतद्' शब्दस्य पुंलिङ्गे -** **चतुर्थीविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्मै | एताभ्याम् | एतेभ्यः |
| तद् | तस्मै | ............. | तेभ्यः |
| यद् | यस्मै | ............. | येभ्यः |
| किम् | कस्मै | ............. | केभ्यः |
| सर्व | ............. | सर्वाभ्याम् | सर्वेभ्यः |
| इदम् | अस्मै | आभ्याम् | एभ्यः |

**'एतद्' शब्दस्य पुंलिङ्गे -** **पञ्चमीविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्मात् | एताभ्याम् | एतेभ्यः |
| तद् | तस्मात् | ............. | तेभ्यः |
| यद् | यस्मात् | याभ्याम् | ............. |
| किम् | ............. | काभ्याम् | केभ्यः |
| सर्व | सर्वस्मात् | ............. | सर्वेभ्यः |
| इदम् | अस्मात् | आभ्याम् | ............. |

**'एतद्' शब्दस्य पुंलिङ्गे -** **षष्ठीविभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| | एतस्य | एतयोः | एतेषाम् |
| तद् | तस्य | ............. | तेषाम् |
| यद् | यस्य | ............. | येषाम् |
| किम् | ............. | कयोः | केषाम् |
| सर्व | सर्वस्य | ............. | सर्वेषाम् |
| इदम् | अस्य | अनयोः | एषाम् |

**'एतद्' शब्दस्य पुंलिङ्गे -** **सप्तमीविभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| | एतस्मिन् | एतयोः | एतेषु |
| तद् | तस्मिन् | तयोः | ............. |
| यद् | ............. | ययोः | येषु |
| किम् | कस्मिन् | कयोः | ............. |
| सर्व | ............. | सर्वयोः | सर्वेषु |
| इदम् | अस्मिन् | अनयोः | एषु |

**'एतद्' शब्दस्य नपुंसकलिङ्गे -**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|
| **एतत्** फलम् | **एते** फले | **एतानि** फलानि |
|  |  |  |

**प्रथमाविभक्तिः**

| | | | |
|---|---|---|---|
| तद् | तत् | ते | तानि |
| यद् | यत् | ये | .......... |
| किम् | किम् | .......... | कानि |
| सर्व | .......... | सर्वे | सर्वाणि |
| इदम् | इदम् | इमे | .......... |

| | | | |
|---|---|---|---|
| **द्वितीयाविभक्तिः** | एतत् | एते | एतानि |
| तद् | तत् | .......... | तानि |
| यद् | .......... | ये | यानि |
| किम् | किम् | .......... | कानि |
| सर्व | .......... | सर्वे | सर्वाणि |
| इदम् | इदम् | .......... | इमानि |

**तृतीयातः सप्तमीं यावत् पुंलिङ्गवत् -**

**पश्यत, लिखत -**

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **प्रथमाविभक्तिः**

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|
| **एषा** माला | **एते** माले | **एताः** मालाः |
|  |  |  |

| | | | |
|---|---|---|---|
| तद् | सा | ते | .......... |
| यद् | या | ............. | याः |
| किम् | का | के | ............. |
| सर्व | सर्वा | ............. | सर्वाः |
| इदम् | इयम् | इमे | .......... |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **द्वितीयाविभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| | एताम् | एते | एताः |
| तद् | ताम् | ते | ............. |
| यद् | याम् | ............. | याः |
| किम् | ............. | के | काः |
| सर्व | सर्वाम् | सर्वे | ............. |
| इदम् | इमाम् | ............. | इमाः |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **तृतीयाविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतया | एताभ्याम् | एताभिः |
| तद् | तया | ताभ्याम् | ........... |
| यद् | यया | ............. | याभिः |
| किम् | कया | .............. | काभिः |
| सर्व | सर्वया | ............... | सर्वाभिः |
| इदम् | अनया | आभ्याम् | आभिः |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **चतुर्थीविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्यै | एताभ्याम् | एताभ्यः |
| तद् | तस्यै | ............. | ताभ्यः |
| यद् | यस्मै | ............. | याभ्यः |
| किम् | कस्यै | ............. | काभ्यः |
| सर्व | सर्वस्यै | सर्वाभ्याम् | ............. |
| इदम् | अस्यै | ............. | आभ्यः |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **पञ्चमीविभक्तिः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | एतस्याः | एताभ्याम् | एताभ्यः |
| तद् | तस्याः | ............. | ताभ्यः |
| यद् | यस्याः | याभ्याम् | ............. |
| किम् | ............. | काभ्याम् | काभ्यः |
| सर्व | सर्वस्याः | ............. | सर्वाभ्यः |
| इदम् | अस्याः | ............. | आभ्य |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **षष्ठीविभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| | एतस्याः | एतयोः | एतासाम् |
| तद् | तस्याः | ............. | तासाम् |
| यद् | यस्याः | ............. | यासाम् |
| किम् | ............. | कयोः | कासाम् |
| सर्व | सर्वस्याः | ............. | सर्वासाम् |
| इदम् | अस्याः | अनयोः | आसाम् |

**'एतद्' शब्दस्य स्त्रीलिङ्गे -** **सप्तमीविभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| | एतस्याम् | एतयोः | एतासु |
| तद् | तस्याम् | तयोः | ............. |
| यद् | ............. | ययोः | यासु |
| किम् | कस्याम् | कयोः | ............. |
| सर्व | सर्वस्याम् | ............. | सर्वासु |
| इदम् | अस्याम् | अनयोः | ............. |

•

# यत्नेन सिद्धि:

कश्चित् पथिक: मार्गे गच्छति स्म । आतपेन स: श्रान्त: अभवत् । गमनसमये स: मार्गपार्श्वे एकं विशालं **वृक्षम्** अपश्यत् । तस्य अध: एक: **शीर्ण:** वृद्ध: उपविशति स्म । **क्लान्त: पथिक:** चलनक्षम: न आसीत् । अत: स: तं वृद्धं पृष्टवान् - भो: महाशय ! इत: कियद् दूरे ग्राम: अस्ति ? भवान् जानाति वा ?

वृद्ध: किमपि उत्तरं न दत्तवान् । पथिक: बहुवारं पृष्टवान् । परन्तु किमपि उत्तरं न प्राप्तवान् । **श्रान्त: पथिक:** कुपित: अभवत् । स: मनसा तं वृद्धम् अनिन्दत्, अग्रे गमनाय यत्नं कृतवान् च ।

पथिक: यदा **त्रिचतुराणि पदानि** अग्रे अगच्छत्, तदा स: वृद्ध: तम् उच्चस्वरेण आहूतवान् । **विस्मित: पथिक:** पृष्ठदेशम् अवलोकितवान् । तदा स: वृद्ध: वदति - महोदय ! गन्तव्य: ग्राम: इत: क्रोशमिते दूरे अस्ति इति ।



**कुपित: पथिक:** तम् अवदत् - पूर्वम् अहं पुन: पुन: पृष्टवान् । भवान् किमपि उत्तरं न ददाति । इदानीं पृष्ठत: किमर्थं वदति ? वृद्ध: **शान्तेन स्वरेण** उक्तवान् - तदा भवान् अग्रे गमिष्यति न वा इति अहं न ज्ञातवान् । यदि भवान् अग्रे न गच्छति, तर्हि मम उत्तरं व्यर्थं स्यात् । इदानीं भवान् नूनम् अग्रे गमिष्यति इति निश्चितम् । अत: उत्तरं ददामि । य: गच्छति स: एव गन्तव्यस्थानं प्राप्नोति । अत एव उक्तम् -

**यत्नशीलस्य जनस्य भाग्यं नित्यश: फलति इति ।**

| **श्रान्त:, शीर्ण:, क्लान्त:, नित्यश:, स्वरेण, इत: ।** |
|---|

**कर्तृपदानि-** पथिक:, वृद्ध:, ग्राम:, विस्मित:, भवान्,।

**क्रियापदानि-** अपश्यत्, जानाति, अस्ति, ददाति, वदति।

**शब्दार्थ:**

श्रान्त: - परिश्रमयुक्त: - (ପରିଶ୍ରମ ଯୁକ୍ତ) ।

शीर्ण: - दुर्बल: - (ଦୁର୍ବଳ) ।

इत: - अस्मात् स्थानात् - (ଏହି ସ୍ଥାନରୁ) ।

मनसा - मनोद्वारा - (ମନରେ) ।

अवलोकितवान् - अवलोकनं कृतवान् (ଦେଖିଲା) ।

क्रोशमिते - क्रोशपरिमिते (କୋଶେ ପରିମାଣର ଦୁଇମାଇଲ ପ୍ରାୟ ୩ କିଲୋ ମିଟର) ।

अध: - तले / निम्नदेशे (ତଳେ) ।

क्लान्त: - क्लान्तिं प्राप्त: (ଥକିଯାଇଥିବା) ।

कुपित: - क्रोधयुक्त: (ରାଗିକରି) ।

विस्मित: - आश्चर्ययुक्त: (ବିସ୍ମୟଯୁକ୍ତ ହୋଇ) ।

गन्तव्य: - गमनयोग्य: (ଯିବା ଯୋଗ୍ୟ) ।

व्यर्थम् - निरर्थकम् (ବ୍ୟର୍ଥ) ।

प्राप्नोति - लभते (ପହଞ୍ଚେ) ।

## अभ्यास :

१. **एकेन पदेन उत्तरं लिखत -**(ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)

(क) पथिक: श्रान्त: कथम् अभवत् ? ..........................................

(ख) पथिक: मार्गे किम् अपश्यत् ? ..........................................

(ग) ग्राम: इत: कियत् दूरे अस्ति ? ..........................................

(घ) कीदृश: पथिक: कुपित: अभवत् ? ..........................................

(ङ) क्रोशमिते दूरे क: अस्ति ? ..........................................

(च) य: गच्छति स: एव किं प्राप्नोति ? ..........................................

(छ) कस्य जनस्य भाग्यं नूनं फलति ? ..........................................

२. **मातृभाषया अनुवादं कुरुत : (**ମାତୃଭାଷାରେ ଅନୁବାଦ କର**)**

(क) कश्चित् पथिक: मार्गे गच्छति स्म। ..........................................

(ख) आतपेन स: क्लान्त: अभवत्। ..........................................

(ग) भवान् जानाति वा ? ..........................................

(घ) पथिक: बहुवारं पृष्टवान्। ..........................................

(ङ) तदा स: वृद्ध: वदति। ..........................................

३. **शून्यस्थानं पूरयत ।** (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) ............... पथिक: ।

(ख) ............... ग्राम: ।

(ग) शीर्ण: ............... ।

(घ) विशालं ............... ।

(ङ) श्रान्त: ............... ।

(च) यत्नशीलस्य ............... ।

**(वृक्षम्, जनस्य, पथिक:, वृद्ध:, क्लान्त:, गन्तव्य:)**

४. **रेखाङ्कितपदस्य संशोधनं कुरुत ।** (ରେଖାଙ୍କିତ ପଦକୁ ଠିକ୍ କର)

(क) एकं विशाल: वृक्षम् अपश्यत् ।

(ख) क्लान्त: पथिकं चलनक्षम: न आसीत् ।

(ग) विस्मितं पथिक: पृष्ठदेशम् अवलोकितवान् ।

(घ) गन्तव्य: ग्रामं इत: क्रोशमिते दूरे अस्ति ।

(ङ) वृद्ध: शान्तं स्वरेण उक्तवान् ।

५. **स्तम्भद्वयं योजयत -** (ସ୍ତମ୍ଭ ମିଳାଅ)

| **'क'** | **'ख'** |
|---|---|
| विशालम् | वृद्ध: |
| शीर्ण: | पथिक: |
| क्लान्त: | कुपित: |
| पथिक: | वृक्षम् |
| गन्तव्य: | ग्राम: |

६. वाक्यानि रचयत (ବାକ୍ୟ ରଚନା କର)

उपविशति, वदति, भवान्, ददाति, आसीत्।

७. शुद्धपदं रचयत (ଶୁଦ୍ଧପଦ ଲେଖ)

थि प क: ...............................................

म हो य: द ...............................................

म कि पि ..............................................

वा न् भ ..............................................

उ र त्त म् ..............................................

८. सन्धिविच्छेदं कुरुत (ସନ୍ଧିବିଚ୍ଛେଦ କର)

किमपि ..............................................

निश्चितम् ..............................................

प्राप्नोति ..............................................

कश्चित् ..............................................

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)



स्थूल: गज:



विशालं भवनम्



सुन्दरी महिला

| **विशेषणम्** | **विशेष्यम्** | **विशेषणम्** | **विशेष्यम्** | **विशेषणम्** | **विशेष्यम्** |
|---|---|---|---|---|---|
| दीर्घ: | मार्ग: | मधुरं | लड्डुकम् | कृशा | बालिका |
| गभीर: | सागर: | विशालं | मन्दिरम् | उत्तमा | मापिका |
| चतुर: | काक: | दिव्यम् | औषधम् | प्रसिद्धा | लेखिका |
| निर्मल: | आकाश: | महत् | वनम् | महती | नदी |
| महान् | जन: | सरलं | संस्कृतम् | सुन्दरी | नगरी |

**उदाहरणानुसारं विशेषण-विशेष्ययो: लेखनं कुरुत -**

| *यथा -* | | *विशेषणम्* | *विशेष्यम्* |
|---|---|---|---|
| (क) विशालं | वृक्षम् | विशालं | वृक्षम् |
| (ख) शीर्ण: | वृद्ध: | .............. | .............. |

| | | | | |
|---|---|---|---|---|
| (ग) | क्लान्तः | पथिकः | .............. | .............. |
| (घ) | श्रान्तः | जनः | .............. | .............. |
| (ङ) | गन्तव्यः | ग्रामः | .............. | .............. |
| (च) | यत्नशीलस्य | लोकस्य | .............. | .............. |
| (छ) | कुपितः | पथिकः | .............. | .............. |
| (ज) | बुद्धिमती | बालिका | .............. | .............. |
| (झ) | सुन्दरी | नगरी | .............. | .............. |

***विशेष्यस्य यत् वचनं तदेव वचनं विशेषणस्य -***

| | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| **यथा -** | उन्नतः वृक्षः | उन्नतौ वृक्षौ | उन्नताः वृक्षाः |
| | नूतनं सङ्गणकम् | नूतने संगणके | नूतनानि संगणकानि |
| | रम्या कथा | रम्ये कथे | रम्याः कथाः |

**विशेष्यस्य वचनानुसारं विशेषणस्य प्रयोगं कुरुत -**

| | | | |
|---|---|---|---|
| उदाहरणम् - | पक्वं फलम् । | पक्वे फले । | पक्वानि फलानि (पक्व) |
| (क) | ............ स्यूतः । | ............ स्यूतौ । | ............ स्यूताः (शोभन) |
| (ख) | ............ लता । | ............ लते । | ............ लताः । (दीर्घ) |
| (ग) | ............ सूत्रम् । | ............ सूत्रे । | ............ सूत्राणि । (कठिन) |
| (घ) | ............ गर्तः । | ............ गर्तौ । | ............ गर्ताः । (गभीर) |
| (ङ) | नूतनी लेखनी । | ............ लेखन्यौ । | ............ लेखन्यः । (नूतन) |
| (च) | ............ आश्रमः । | ............ आश्रमौ । | ............ आश्रमाः । (शान्त) |
| (छ) | ............ युतकम् । | ............ युतके । | ............ युतकानि । (शुभ्र) |
| (ज) | शोभना घटी । | ............ घट्यौ । | ............ घट्यः । (शोभन) |
| (झ) | ............ दर्पणः । | ............ दर्पणौ । | ............ दर्पणाः । (निर्मल) |

●

# गन्धमादनः



पुण्यभूमिः **उत्कलः** गिरिनदीवनभूमिभिः विमण्डितः। एतस्य उच्चपर्वतेषु गन्धमादनः अन्यतमः । गन्धमादनपर्वतमालायाः समुच्चशृङ्गस्य उच्चता ३२३४ (चतुस्त्रिंशदधिकद्वात्रिंशत्शत) फुटपरिमिता भवति। एषः बलांगिरवरगड़मण्डलयोः प्राकृतिकप्राचीरम् अस्ति। खनिजद्रव्यनिमित्तं गन्धमादनः विश्वप्रसिद्धः । एषः बलांगिरतः सप्तविंशतिक्रोशदूरे अवस्थितः । गन्धमादनः घनश्यामवनराजिभिः परिवेष्टितः । अतः पर्यटकानां मनः हरति । अत्र नानाविधाः पशुपक्षिणः निवसन्ति । अनेकाः दुर्लभाः आयुर्वेदवृक्षलताः सन्ति । अतः गन्धमादनं निकषा एकः आयुर्वेदमहाविद्यालयः स्थापितः । ह्वेनसांगः गन्धमादनं **परिमलगिरिः** इति लिखितवान् ।

गन्धमादनस्य उत्तरपार्श्वे नृसिंहनाथमन्दिरम् अवस्थितम् । एतत् **कोणार्कमन्दिरशैल्या** कारुखचितं भवति ।अत्र पर्वतशिखरात् जलप्रपातः तुषारभ्रमं करोति ।झराणां कलनादः अतीव चित्ताकर्षकः ।नृसिंहचतुर्दश्याम् अत्र एका विशाला मेला भवति । तदा यात्रिकाः भक्ताः **परिवारेण** सह आगच्छन्ति । **भक्त्या** देवं प्रणमन्ति । **तस्मै** पुष्पार्घ्यं समर्पयन्ति । ततः पार्वत्य**मार्गेण** हरिशङ्करपीठं गच्छन्ति । **मार्गम्** उभयतः प्राकृतिकशोभा रमणीया भवति ।

गन्धमादनस्य दक्षिणपार्श्वे हरिशंकरमन्दिरं राजति । एतत् मन्दिरं नृपतेः वैजलदेवस्य पत्नी दुर्लभादेवी निर्मितवती । **मन्दिरं** परितः विविधाः पुष्पपादपाः शोभां वर्द्धयन्ति । पर्यटकाः विहारयात्रार्थं **हरिशंकरं** प्रति आगच्छन्ति । यात्रिकाः **देवदर्शनेन** सह पर्वतारोहणस्य **मोदं** नयन्ति । निर्झरेषु जलक्रीड़ां कृत्वा पथश्रमम् अपनोदयन्ति । जलप्रपातानां दृश्यम् अतीव मनोहरं भवति । शीतकाले अत्रत्यपरिवेशः हर्षकः । पर्यटकाः विलासिजनाः च **हरिशंकरं** ग्रीष्मनिवासरूपेण व्यवहरन्ति । एतत् स्थानं ओड़िशाराज्यस्य प्रमुखं पर्यटनकेन्द्रं भवति ।

गन्धमादनगमनं विना न कश्चित् वास्तविकम् अनुभवं प्राप्नोति । अतः एतत् स्थानं सर्वेषां दर्शनीयम् ।

| **विमण्डितः, गन्धमादनः, कलनादः, यात्रिकाः, मोदं, व्यवहरन्ति, निर्झरेषु, चित्ताकर्षकः ।** |
|---|

**कर्तृपदानि-** उत्कलः, गन्धमादनः, ह्वेनसाङ्गः, मेला, यात्रिकाः

**क्रियापदानि-** हरति, निवसन्ति, सन्ति, करोति, समर्पयन्ति, राजति, प्राप्नोति

**शब्दार्थ :**

विमण्डित: - अलंकृत: (ଅଳଂକୃତ) ।

३२३४ फुटपरिमिता - चतुस्त्रिंशदधिकद्वात्रिंशत्शत फुटपरिमिता

सप्तविंशतिक्रोश - ८१ कि.मि. परिमितं दूरत्वम् (୨୭ କୋଶ ବା ୮୧ କି.ମି.) ।

कारुखचितम् - शिल्पकलायुक्तम् (ଶିଳ୍ପକଳାଯୁକ୍ତ) ।

झराणाम् - निर्झराणाम् (ଝରଣାମାନଙ୍କର) ।

यात्रिका: - यात्रिण: (ଯାତ୍ରୀମାନେ) ।

राजति - शोभते । (ଶୋଭାପାଉଛି) ।

विहारयात्रार्थम् - परिभ्रमणाय (ବୁଲିବା ପାଇଁ) ।

अपनोदयन्ति - दूरीकुर्वन्ति, निवारयन्ति (ଦୂର କରନ୍ତି) ।

हर्षक: - आनन्ददायक: (ଆନନ୍ଦଦାୟକ) ।

व्यवहरन्ति - व्यवहारं कुर्वन्ति (ବ୍ୟବହାର କରିଥାନ୍ତି) ।

वास्तविकम् - यथार्थम् (ଯଥାର୍ଥ) ।

प्राप्नोति - लाभं करोति । (ପାଇଥାନ୍ତି) ।

## अभ्यास :

१. **एकपदेन उत्तरं लिखत -** (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)

(क) गन्धमादनं परिमलगिरि: इति क: लिखितवान्?

(ख) भक्ता: देवाय किम् अर्पयन्ति ?

(ग) के मन्दिरस्य शोभां वर्द्धयन्ति ?

(घ) पर्यटका: विहारयात्रार्थं कुत्र आगच्छन्ति ?

(ङ) का हरिशंकरमन्दिरं निर्मितवती ?

(पुष्पार्घ्यम्, ह्वेनसाङ्ग्: पुष्पपादपा:, दुर्लभादेवी, हरिशङ्करम्)

२. **बन्धनीमध्यस्थयथार्थशब्दै: शून्यस्थानानि पूरयत -** (ବନ୍ଧନୀ ମଧ୍ୟରୁ ଉପଯୁକ୍ତ ଶବ୍ଦବାଛି ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) अत्र नानाविधा: पशुपक्षिण: .................... । (निवसति, निवसत:, निवसन्ति)

(ख) ............ उभयत: प्राकृतिकशोभा रमणीया । (मार्गस्य, मार्गम्, मार्गाय)

(ग) दृश्यम् अतीव ........... भवति । (मनोहर:, मनोहारी, मनोहरम्)

(घ) ............... पुष्पार्घ्यं समर्पयन्ति । (तस्मात्, तस्मिन्, तस्मै)

(ङ) .............. देवं प्रणमन्ति । (भक्तौ, भक्त्या, भक्ते:)

३. **मातृभाषया अनुवादं कुरुत -** (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

(क) अत्र नानाविधा: पशुपक्षिण: निवसन्ति ।

(ख) यात्रिका: भक्ता: परिवारेण सह आगच्छन्ति ।

(ग) तस्मै पुष्पार्घ्यं समर्पयन्ति ।

(घ) शीतकाले अत्रत्यपरिवेश: हर्षक: ।

(ङ) अत: एतत् स्थानं सर्वेषां दर्शनीयम् ।

४. **शुद्धपदं रचयत -** (ଶୁଦ୍ଧପଦ ଲେଖ)

ग मा न्ध द न:, पु ष्प पा पा: द, शं रि ह क र:, ग: ह्वे सां न, ना नृ ह सिं थ:,

५. **स्तम्भमेलनं कुरुत -** (ସ୍ତମ୍ଭ ମିଳାଅ)

| **'क' स्तम्भ:** | **'ख' स्तम्भ:** |
|---|---|
| तस्मै | लता: |
| मन्दिरं | नयन्ति |
| मार्गम् | परित: |
| अनेका: | देवाय |
| मोदं | उभयत: |

६. **रेखाङ्कितपदस्य संशोधनं कुरुत -** (ରେଖାଙ୍କିତ ପଦକୁ ଠିକ୍ କର)

(क) <u>पर्वतस्य</u> निकषा महाविद्यालय: अस्ति ।

(ख) ते <u>भक्तिना</u> देवं पूजयन्ति ।

(ग) नानाविधा: <u>पशुपक्षय:</u> निवसन्ति ।

(घ) झराणां कलनाद: <u>चित्ताकर्षकम्</u> ।

(ङ) शीतकाले अत्रत्यपरिवेश: <u>हर्षका:</u> ।

७. **वाक्यानि रचयत-** (ବାକ୍ୟରଚନା କର)

निकषा, उभयत:, परित:, विना

८. **सन्धिविच्छेदं कुरुत** (ସନ୍ଧିବିଚ୍ଛେଦ କର)-

चित्ताकर्षकः, पुष्पार्घ्यम्, पर्वतारोहणस्य, विहारयात्रार्थम्, कश्चित्, अतीव

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)

**(क) उच्चैः पठत, लिखत च - (ବଡ଼ପାଟିରେ ପଢ଼ ଓ ଲେଖ)(अकारान्त - पुंलिङ्गशब्दाः)**

**प्रथमाविभक्तिः**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालक | बालकः | बालकौ | बालकाः |
| देव | .......... | .......... | .......... |
| गज | .......... | .......... | .......... |
| | **(आकारान्त - स्त्रीलिङ्गशब्दाः)** | | |
| बालिका | बालिका | बालिके | बालिकाः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |
| | **(ईकारान्त - स्त्रीलिङ्गशब्दाः)** | | |
| नदी | नदी | नद्यौ | नद्यः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |
| | **अकारान्त - नपुंसकलिङ्ग-शब्दाः** | | |
| फल | फलम् | फले | फलानि |
| जल | .......... | .......... | .......... |
| पत्र | .......... | .......... | .......... |

(ख) (अकारान्त - पुंलिङ्ग-शब्दाः)

**द्वितीयाविभक्तिः**

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| बालक | बालकम् | बालकौ | बालकान् |
| देव | .......... | .......... | .......... |
| गज | .......... | .......... | .......... |
| **(आकारान्त - स्त्रीलिङ्ग-शब्दाः)** | | | |
| बालिका | बालिकाम् | बालिके | बालिकाः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |
| **(ईकारान्त - स्त्रीलिङ्ग-शब्दाः)** | | | |
| नदी | नदीम् | नद्यौ | नदीः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |
| **(अकारान्त - नपुंसकलिङ्ग-शब्दाः)** | | | |
| फल | फलम् | फले | फलानि |
| जल | .......... | .......... | .......... |
| पत्र | .......... | .......... | .......... |

(ग) (अकारान्त - पुंलिङ्ग-शब्दाः)

**तृतीयाविभक्तिः**

| | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| बालक | बालकेन | बालकाभ्याम् | बालकैः |
| देव | .......... | .......... | .......... |
| गज | .......... | .......... | .......... |
| **(आकारान्त - स्त्रीलिङ्ग-शब्दाः)** | | | |
| बालिका | बालिकया | बालिकाभ्याम् | बालिकाभिः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |

**(ईकारान्त - स्त्रीलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| नदी | नद्या | नदीभ्याम् | नदीभिः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |

**(अकारान्त - नपुंसकलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| फल | फलेन | फलाभ्याम् | फलैः |
| जल | .......... | .......... | .......... |
| पत्र | पत्रेण | .......... | .......... |

**(घ) (अकारान्त - पुंलिङ्ग-शब्दाः)**

**चतुर्थीविभक्तिः**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालक | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| देव | .......... | .......... | .......... |
| गज | .......... | .......... | .......... |

**(आकारान्त - स्त्रीलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| बालिका | बालिकायै | बालिकाभ्याम् | बालिकाभ्यः |
| पत्रिका | .......... | .......... | .......... |
| मुद्रिका | .......... | .......... | .......... |

**(ईकारान्त - स्त्रीलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| नदी | नद्यै | नदीभ्याम् | नदीभ्यः |
| देवी | .......... | .......... | .......... |
| भवती | .......... | .......... | .......... |

**(अकारान्त - नपुंसकलिङ्ग-शब्दाः)**

| | | | |
|---|---|---|---|
| फल | फलाय | फलाभ्याम् | फलेभ्यः |
| जल | .......... | .......... | .......... |
| पत्र | .......... | .......... | .......... |

●

# इस्पातनगरी



विश्वप्रसिद्धाम् इत्पातनगरीं को वा न जानाति ? ओडिशाराज्यस्य प्रमुखं स्थानं राउरकेला । एषा एव इस्पातनगरीरूपेण ख्याता । अत्र शंख-कोएलनदीद्वयस्य **संयोगात्** ब्राह्मणीनद्याः उत्पत्तिः भवति । जनाः **अस्याः नद्याः** जलं नीत्वा कृषिं कुर्वन्ति । अत्रापि वेदव्यासस्य जन्मस्थली अस्ति इति जनश्रुतिः । एतद् एकं पुण्यक्षेत्रं भवति । एतस्य प्राकृतिकपरिवेशः आकर्षणीयः । अत्र महत् अरण्यम् आसीत् । क्रमशः अत्र वेदव्यासाश्रमः, पवित्रगोशाला, वैदिकगुरुकुलाश्रमः, संस्कृत-महाविद्यालयद्वयं च स्थापितानि । एतानि अस्माकं संस्कृतेः प्रचारं प्रसारं च कुर्वन्ति ।

अस्मिन् पुण्यक्षेत्रे १९५४ मिते वत्सरे भारतसर्वकारपक्षतः इस्पात-शिल्पागारस्य निर्माणम् आरब्धम् । तदा भारतस्य राष्ट्रपतिः डॉ. राजेन्द्रप्रसादः आसीत् । सः ३.२.१९५९ मिते दिनाङ्के शिल्पागारम् उद्घाटितवान् । अस्मात् **शिल्पागारात्** अस्माकं राज्यस्य देशस्य च कृते प्रभूतम् अर्थोपार्जनं भवति । सहस्रं सहस्रं जनाः **अस्मात्** वेतनं प्राप्नुवन्ति । तेन परिवारान् पोषयन्ति ।

अत्र हनुमद्वाटिका अस्ति । एषा अतीव मनोहारिणी भूमिः । अत्र सुविशाला हनुमद्मूर्तिः स्थापिता अस्ति । एषा एसिआमहादेशस्य अन्यतमा उच्चमूर्तिः भवति । राउरकेला कलानगरी इति परिचिता । अत्र विभिन्नभाषाभाषिजनाः निवसन्ति । एषा गीत-नृत्य-नाटक-चित्रकलाभिः गौरवान्विता ।

अतः एकवारम् इस्पातनगरी अवश्यं द्रष्टव्या ।

| **ख्याता, उत्पत्तिम्, स्थापितानि, वत्सरे, आरब्धम्, द्रष्टव्या, प्रभूतम् ।** |
|---|

**कर्तृपदानि-** राउरकेला, जनाः, पुण्यक्षेत्रम्, राष्ट्रपतिः, भूमिः

**क्रियापदानि-** जानाति, कुर्वन्ति, पोषयन्ति, निवसन्ति

**शब्दार्थ: -**

जनश्रुति: - लोककथा (ଲୋକକଥା), आरब्धम् - आरम्भ: अभवत् (ଆରମ୍ଭ ହେଲା), पोषयन्ति - पालनं कुर्वन्ति (ପାଳନ କରନ୍ତି), प्रभूतम् - प्रचुरम् (ପ୍ରଚୁର) ।

३.२.१९५९ मिते दिनाङ्के एकोनषष्ट्यधिकनवदशशततमवर्षस्य फेवृआरीमासस्य तृतीये दिनाङ्के (୧୯୫୯ ମସିହା ଫେବୃୟାରୀ ତିନିତାରିଖ)

## अभ्यास:

१. **एकपदेन उत्तरं लिखत - (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)**

(क) ओडिशाराज्यस्य कीदृशं स्थानं राउरकेला ?

(ख) अत्र शंख-कोएलनदीद्वयस्य संयोगात् कस्या: उत्पत्ति: भवति?

(ग) अत्र महत् किम् आसीत् ?

(घ) एतानि अस्माकं कस्या: प्रचारं प्रसारं च कुर्वन्ति ?

(ङ) राउरकेला का इति परिचिता ?

(कलानगरी, संस्कृते:, प्रमुखम्, अरण्यम्, बाहमणीनद्या:)

२. **बन्धनीमध्यस्थयथार्थपदै: शून्यस्थानानि पूरयत (ବନ୍ଧନୀ ମଧ୍ୟରେ ଥିବା ଉପଯୁକ୍ତ ପଦଦ୍ୱାରା ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)।**

(क) एतद् ........... पुण्यक्षेत्रं भवति। (एक:, एका, एकम्)

(ख) ........... परिवारान् पोषयन्ति। (स:, तेन, तस्यै)

(ग) सहस्रं सहस्रं जना: ................ वेतनं प्राप्तुवन्ति। (अस्य, अस्मात्, अस्यै)

(घ) अत्र ............. अरण्यम् आसीत्। (महान्, महती, महत्)

(ङ) .............. नीत्वा कृषिं कुर्वन्ति। (स्थानम्, वेतनम्, जलम्)

३. **मातृभाषया अनुवादं कुरुत। (ମାତୃଭାଷାରେ ଅନୁବାଦକର)**

(क) जना: अस्या: नद्या: जलं नीत्वा कृषिं कुर्वन्ति।

(ख) अत्र विभिन्नभाषाभाषिजना: निवसन्ति।

(ग) अत: एकवारम् इस्पातनगरी अवश्यं द्रष्टव्या।

(घ) अत्र सुविशाला हनुमद्मूर्ति: स्थपिता अस्ति।

(ङ) ओड़िशाराज्यस्य प्रमुखं स्थानं राउरकेला।

४. **शुद्धपदं रचयत।** (ଶୁଦ୍ଧପଦ ଲେଖ)

(क) ता प चि रि ....................

(ख) ला रा के उ र ....................

(ग) ली ज न्म स्थ ....................

(घ) सः वे द व्या ....................

(ङ) स्य त भा र ....................

५. **स्तम्भमेलनं कुरुत** (ସ୍ତମ୍ଭମିଳନ କର)

| **(क)** | **(ख)** |
|---|---|
| भारतस्य | पोषयन्ति |
| पुण्यक्षेत्रम् | भूमिः |
| अस्मात् | नद्यः |
| परिवारान् | राष्ट्रपतिः |
| मनोहारिणी | वेतनम् |
| अस्याः | भवति |

६. **रेखाङ्कितपदस्य संशोधनं कुरुत।** (ରେଖାଙ୍କିତପଦର ସଂଶୋଧନ କର)

(क) जनाः <u>अस्य</u> नद्याः जलं नीत्वा कृषिं कुर्वन्ति।

(ख) अत्र विभिन्नभाषाभाषिजनाः <u>निवसति</u>।

(ग) सहस्रं सहस्रं जनाः <u>अस्मिन्</u> वेतनं प्राप्नुवन्ति।

(घ) इस्पात-शिल्पागारस्य <u>निर्माणः</u> आरब्धम्।

(ङ) सुविशाला <u>हनुमान्मूर्तिः</u> स्थपिता।

६. **वाक्यानि रचयत** (ବାକ୍ୟ ରଚନା କର)

नीत्वा, आसीत्, प्राप्नुवन्ति, निवसन्ति, प्रभूतम्

८. **सन्धिविच्छेदं कुरुत** (ସନ୍ଧିବିଚ୍ଛେଦ କର)

गौरवान्विता, अर्थोपार्जनम्, अत्रापि, शिल्पागारम्, मनोहारिणी

**तव कृते करणीयम्** (ତୁମପାଇଁ କାମ)

1. **उच्चै: पठत, लिखत -च (अकारान्त - पुंलिङ्गशब्दा:)**(ବଡ଼ପାଟିରେ ପଢ଼, ଲେଖ)

**पञ्चमीविभक्ति:**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालक | बालकात् | बालकाभ्याम् | बालकेभ्य: |
| देव | ........... | ........... | ........... |
| गज | ........... | ........... | ........... |

## (आकारान्त - स्त्रीलिङ्ग-शब्दा:)

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालिका | बालिकाया: | बालिकाभ्याम् | बालिकाभ्य: |
| पत्रिका | ........... | ........... | ........... |
| मुद्रिका | ........... | ........... | ........... |

## ईकारान्त-स्त्रीलिङ्ग-शब्दा:

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| नदी | नद्या: | नदीभ्याम् | नदीभ्य: |
| देवी | ........... | ........... | ........... |
| भवती | ........... | ........... | ........... |

## अकारान्त-नपुंसकलिङ्ग-शब्दा:

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| फल | फलात् | फलाभ्याम् | फलेभ्य: |
| जल | ........... | ........... | ........... |
| पत्र | ........... | ........... | ........... |

●

# व्यासकवि: फकीरमोहन:



महर्षि: व्यासदेव: **महाभारतस्य** रचयिता । फकीरमोहनसेनापति: ओडिआभाषया महाभारतस्य अनुवादं कृतवान् । अत: व्यासदेवस्य नामानुसारेण **उत्कलीयानां समीपे** स: व्यासकवि: इति नाम्ना ख्यात: । स: **बाल्ये** संस्कृतस्य अध्ययनं कृतवान् । ओडिआ-रचनासु **संस्कृतस्य** बहुलं प्रयोगं स: कृतवान् । स: अपि ओडिआ- **भाषाया:** रक्षकरूपेण परिचित: ।

१८४३मिते ख्रीष्टाब्दे मकरसंक्रान्तिदिवसे फकीरमोहन: जात: । **तस्य** जन्मस्थानं **बालेश्वरनगरस्य** मल्लिकाशपुरम् । बाल्यात् स: अनाथ: । पितामही तस्य लालनं पालनं च अकरोत् । **तस्य** बाल्यकाल: अतीव दु:खपूर्ण: आसीत् । स: प्रथमत: बारवाटीविद्यालये प्राथमिकशिक्षां प्राप्तवान् । अनन्तरं स: तत्र एव शिक्षक: अभवत् । स: तदनन्तरं मिशन्विद्यालये प्रधानशिक्षकरूपेण नियुक्त: । तस्य प्रखरा बुद्धि: आसीत् । आङ्ग्लसर्वकारेण स: 'देवान्' इति **पदे** नियोजित: । स: नीलगिरि-ढेङ्कानाल-केन्दुझर-दशपल्लादिस्थानेषु बहु जनहितकरं कार्यं कृतवान् । स: **संस्कृतस्य** प्रचाराय **नीलगिरिनगरे** संस्कृतविद्यालयं स्थापितवान् । संस्कृतरामायण-महाभारत-**उपनिषदादीनां** ग्रन्थानां स: ओडिआभाषया अनुवादं कृतवान् ।

ओडिआ-**भाषाया:** कृते **फकीरमोहनस्य** दानम् अतुलनीयम् । ओडिआ-**साहित्यस्य** स: प्रथम: कथाकार:, उपन्यासकारश्च । तस्य रेवतीकथा प्रसिद्धा । तत्र रेवत्या: चरित्रं **कुसंस्कारस्य अन्धविश्वासस्य** च द्योतकं भवति । तस्य पेटेण्ट्मेडिसिन्-डाकमुन्सी–राण्डीपुअ अनन्ता-धूलिआबाबाप्रभृतिकथा: अधुना अपि जीविता इव अनुभूयन्ते । तस्य 'छमाण आठगुण्ठ' उपन्यास: अतीव लोकप्रिय: । स: अपि लछमा-मामुँ-प्रायश्चित्त-इति **उपन्यासानां** रचयिता ।

ओडिआभाषाया: सुरक्षार्थं स: सेनापतिरूपेण कार्यं कृतवान् । तस्य निष्ठापर-नेतृत्वेन ओडिआभाषा स्वमर्य्यादां प्राप्तवती । अत: उत्कलीया: तं सेनापति: इति कथयन्ति । १९१८मिते **वर्षे** स: रजसंक्रान्ति-दिवसे दिवंगत: । **उत्कलीयानां** समीपे स: चिरस्मरणीय: सञ्जात: । अधुना **बालेश्वरनगरस्य** मल्लिकाशपुरे तस्य स्मृतिपीठं शोभते । तत्र प्रतिवर्षं तस्य **जन्मदिनस्य** पालनं भवति । **बालेश्वरे** तस्य नाम्ना एक: विश्वविद्यालय: स्थापित: अस्ति ।

**नाम्ना, बहुलम्, पितामही, प्रखरा बुद्धि:, द्योतकम्, सञ्जात:**

LLPD1K

**कर्त्तृपदानि-** महर्षि:, व्यासकवि:, पितामही, कथाकार:, उत्कलीया:

**क्रियापदानि-** शोभते, कथयन्ति, अकरोत्, अनुभूयन्ते।

**शब्दार्थः -**

नियोजितः - नियुक्तः (ନିଯୁକ୍ତ), दिवं गतः - मृतः (ମୃତ), प्रसिद्धा - ख्याता (ଖ୍ୟାତ), द्योतकम् - सूचकम् (ସୂଚକ) । देवान्-अधीक्षकः, परिचालकः (ଦେଓ୍ୱାନ୍ ପଦବୀର ଅଧିକାରୀ) १८४३ (त्रिचत्वारिंशदधिकाष्टादशशत) (୧୮୪୩ ମସିହା) । १९१८ (अष्टादशाधिक नवदशशत) (୧୯୧୮ ମସିହା)

## - अभ्यासः -

१. **एकपदेन उत्तरं लिखत। (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)**

(क) फकीरमोहनः बाल्ये कस्य अध्ययनं कृतवान् ?

(ख) कः ओडिआ-भाषायाः रक्षकः ?

(ग) का फकीरमोहनं पालितवती ?

(घ) फकीरमोहनः कुत्र संस्कृतविद्यालयं स्थापितवान् ?

(ङ) कस्याः चरित्रं कुसंस्कारस्य द्योतकम् ?

(पितामही, संस्कृतस्य, रेवत्याः, फकीरमोहनः, नीलगिरिनगरे)

२. **शून्यस्थानं पूरयत - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) महर्षिः व्यासदेवः .............. रचयिता ।

(ख) तस्य ओडिआ-रचनासु .............. बहुलः प्रयोगः दृश्यते ।

(ग) सः अपि .............. रक्षकरूपेण परिचितः ।

(घ) .............. प्रखरा बुद्धिः आसीत् ।

(ङ) .............. समीपे सः चिरस्मरणीयः सञ्जातः ।

(संस्कृतस्य, तस्य, महाभारतस्य, ओड़िआभाषायाः, उत्कलीयानाम्)

३. **मातृभाषया अनुवादं कुरुत - (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)**

(क) सः बाल्ये संस्कृतस्य अध्ययनं कृतवान् ।

..........................................................................................

(ख) सः अपि ओडिआ-भाषायाः रक्षकरूपेण परिचितः ।

..........................................................................................

(ग) तस्य जन्मस्थानं बालेश्वरनगरस्य मल्लिकाशपुरम् ।

..........................................................................................

(घ) सः प्रथमतः बारवाटीविद्यालये प्राथमिकशिक्षां प्राप्तवान् ।

.....................................................................................

(ङ) तस्य प्रखरा बुद्धिः आसीत् ।

.....................................................................................

(च) सः 'देवान्' इति पदे नियोजितः ।

.....................................................................................

४. **शुद्धपदं रचयत (ଶୁଦ୍ଧପଦ ଲେଖ)**

यथा - ना से प तिः - सेनापतिः

(क) पे स मी - ...............................................

(ख) यः र णी स्म - ...............................................

(ग) न ज क पे ण रू - ...............................................

(घ) अ नु द म् वा - ...............................................

(ङ) ली याः उ त्क - ...............................................

५. **स्तम्भमेलनं कुरुत** । (ସ୍ତମ୍ଭମିଳାଅ)

| 'क' | 'ख' |
|---|---|
| फकीरमोहनः | अध्ययनम् |
| संस्कृतस्य | गतः |
| पितामही | सेनापतिः |
| रेवती | कथा |
| दिवं | पालितवती |

६. **रेखाङ्कितपदस्य संशोधनं कुरुत** । (ରେଖାଙ୍କିତପଦକୁ ଠିକ୍ କର)

(क) सः बाल्ये संस्कृतात् अध्ययनं कृतवान् ।

(ख) बाल्येन सः अनाथः ।

(ग) तस्य प्रखरं बुद्धिः आसीत् ।

(घ) तस्य रेवतीकथा प्रसिद्धम् ।

(ङ) उत्कलीया: तं <u>सेनापतिम्</u> इति कथयन्ति ।

७. **वाक्यानि रचयत** (ବାକ୍ୟଗଠନ କର)

इति, अत:, अनन्तरम्, अस्ति, कृतवान्।

८. **सन्धिविच्छेदं कुरुत** (ସନ୍ଧିବିଚ୍ଛେଦ କର)

तदनन्तरम्, उपन्यासकारश्च, ख्रीष्टाब्दे, सुरक्षार्थम्, सञ्जात:

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)

१. **उच्चै: पठत, लिखत च- (अकारान्त - पुंलिङ्गशब्दा:)** (ବଡ଼ପାଟିରେ ପଢ଼, ଲେଖ)

**षष्ठीविभक्ति :**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| बालक | बालकस्य | बालकयो: | बालकानाम् |
| **शून्यस्थानं पूरयत** | | | |
| देव | ........... | ........... | ........... |
| गज | ........... | ........... | ........... |

### आकारान्त-स्त्रीलिङ्ग-शब्दा:

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| लता | लताया: | लतयो: | लतानाम् |
| **शून्यस्थानं पूरयत** | | | |
| गीता | ........... | ........... | ........... |
| पत्रिका | ........... | ........... | पत्रिकाणाम् |

### ईकारान्त-स्त्रीलिङ्ग-शब्दा:

**षष्ठीविभक्ति:**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| नदी | नद्या: | नद्यो: | नदीनाम् |

**शून्यस्थानं पूरयत**

| | | | |
|---|---|---|---|
| देवी | ........... | ........... | ........... |
| भवती | ........... | ........... | ........... |

## अकारान्त-नपुंसकलिङ्ग-शब्दाः

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| फल | फलस्य | फलयोः | फलानाम् |

**शून्यस्थानं पूरयत**

| | | | |
|---|---|---|---|
| जल | ........... | ........... | ........... |
| पत्र | ........... | ........... | पत्राणाम् |

•

# राष्ट्रवन्दनम्

LLY938

डॉ. विश्वासः



यत्र प्रवहति विमला गङ्गा
यत्र पवित्रं वेदश्रवणम्,
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

यत्र बालगङ्गाधरतिलकः
स्वराज्यशपथं घोषितवान् ।
यत्राहिंसां गान्धिमहात्मा
स्वतन्त्रतासाधनमकरोत् ।।

यत्र रवीन्द्रो मधुरं गानं
राष्ट्रसमुत्तेजकमतनोत् ।
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

यत्र समस्तं मतं समानं
मनुजाः सर्वे सहोदराः ।
यत्र विचारविहङ्गोत्पतने
न भवति काऽपि परिसीमा ।

यत्र च धर्मे न्याये च जनः
सुपथे सततं प्रवर्तते।
तत्र पावने भारतदेशे
भवतान्मम जन्म, भवतान्मम जन्म ।।

**गङ्गा, भारतदेशः, स्वराज्यशपथम्, स्वतन्त्रता, मनुजाः, पावनम्, जन्म, सहोदराः**

**शब्दार्थ : -**

विमला - निर्मला (ପରିଷ୍କୃତା), मनुजाः - मनुष्याः (ମନୁଷ୍ୟମାନେ), विचारविहङ्ग - विचाररूपकपक्षी (ବିଚାର ରୂପକ ପକ୍ଷୀ), उत्पतने - उड्डयने (ଉଡ଼ିବାରେ), परिसीमा - सीमारेखा (ସୀମାରେଖା), भवतात् - भवतु (ହେଉ) ।

## अभ्यास :

१. **मातृभाषया अर्थं लिखत (**ମାତୃଭାଷାରେ ଅର୍ଥଲେଖ**)**

(मनुजाः, भवतात्, उत्पतने, मम, यत्र)

२. **उचितपदेन शून्यस्थानं पूरयत ।** (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) यत्र पवित्रं ________________ ।

(ख) ________________ घोषितवान् ।

(ग) स्वतन्त्रतासाधनम् ________________ ।

(घ) तत्र पावने ________________ देशे ।

(ङ) यत्र ________________ मतं समानम् ।

(च) न भवति काऽपि ________________ ।

(छ) यत्र च धर्मे ________________ च जनः ।

(स्वराज्यशपथम्, न्याये, वेदश्रवणम्, भारते, समस्तम्, परिसीमा)

३. **स्तम्भद्वयं योजयत ।** (ସ୍ତମ୍ଭମିଳାଅ)

| **'क'** | **'ख'** |
|---|---|
| यत्र रवीन्द्रो | विमला गङ्गा |
| स्वराज्यशपथं | भारतदेशे |
| यत्र प्रवहति | सहोदराः |
| तत्र पावने | घोषितवान् |
| मनुजाः सर्वे | मधुरं गानम् |

४. **पद्यानुसारं सज्जीकुरुत ।** (ପଦ୍ୟାନୁଯାୟୀ ସଜାଇଲେଖ)

(क) घोषितवान् स्वराज्यशपथम् ____________

(ख) भवति न कापि परिसीमा ____________

(ग) वेदश्रवणं पवित्रं यत्र ____________

(घ) समस्तं यत्र समानं मतम् ____________

(ङ) भारतदेशे पावने तत्र ____________

(च) सहोदराः सर्वे मनुजाः ____________

५. सन्धिविच्छेदं कुरुत (ସନ୍ଧିବିଚ୍ଛେଦ କର)

भवतान्मम, यत्राहिंसाम्, रवीन्द्रः, काऽपि, साधनमकरोत्

६. वाक्यानि रचयत (ବାକ୍ୟରଚନା କର)

यत्र, अकरोत्, मधुरम्, सर्वे, भवति

७. एकपदेन उत्तरं लिखत (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)

(क) विमला गङ्गा कुत्र प्रवहति ?

(ख) भारतदेशे किं पवित्रम् ?

(ग) कः स्वराज्यशपथं घोषितवान् ?

(घ) रवीन्द्रगानं कीदृशम् ?

(ङ) के सर्वे सहोदराः ?

(भारते, बालगङ्गाधरतिलकः, वेदश्रवणम्, मनुजाः, मधुरम्)

**तव कृते करणीयम्**

ବିଭିନ୍ନ ସୂକ୍ତି ସଂଗ୍ରହକରି ମୁଖସ୍ଥ କର ଓ ତା'ର ଅର୍ଥ ବୁଝ।

•

# विचित्रा सृष्टिः



एकस्मिन् अरण्ये महान् वटवृक्षः **अस्ति** । तस्य कोटरे एकः खञ्जनपरिवारः सानन्दं **निवसति** । कदाचित् खञ्जनपरिवारे एकः नूतनः शावकः जन्म **नयति** । खञ्जनमाता तस्मै प्रतिदिनं भोजनं **ददाति** । एकदा सा स्वस्य कृष्णवर्णं दृष्ट्वा चिन्तितवती - अहो ! ईश्वरस्य पक्षपातः कीदृशः ? केचन सुन्दराः **भवन्ति** । अन्ये केचन कृष्णवर्णाः असुन्दराः च भवन्ति । कोकिलस्य स्वर इव मम स्वरः **नास्ति** । शुकवत् मम सुन्दरं रूपं न भवति । यदि ईश्वरस्य कृपा भवति, तर्हि मम परिवारस्य सर्वे सुवर्णवर्णाः भवेयुः । वयं गर्वं कर्त्तुं **पारयामः** ।

प्रतिदिनम् एवं हीनभावनया पीडिता **भवति** खञ्जनमाता । अस्मिन् समये एकः सुन्दरः शुकः तत्र आगच्छति । यदा वृक्षशाखायां खञ्जनमाता तं पश्यति, तदा तस्याः मनसि ईर्ष्या **आगच्छति** । सा **चिन्तयति**, शुकस्य यत् सौन्दर्यं तत् मयि नास्ति । तस्य गानम्, उड्डयनं कर्णद्वयस्य नेत्रद्वयस्य च तृप्तिं **जनयति** । तदा एकः व्याधः तत्र **आगच्छति** । जालेन शुकस्य बन्धनं **करोति**, पिञ्जरामध्ये तं **स्थापयति** च । भीता खञ्जनमाता शुकस्य अवस्थां **पश्यति** । ईश्वरस्य कृते धन्यवादम् **अर्पयति** । **वदति** च - शुकसदृशं सौन्दर्यं यदि मयि **भवति**, तर्हि अहं तत्क्षणं बन्धनयुक्ता भवेयम् । ईश्वरस्य सृष्टिः व्यवस्थिता अस्ति । अस्माकं मनः तु अव्यवस्थितम् एव ।

अनेन सत्यज्ञानेन खञ्जनमातुः हीनभावना **गच्छति** । सा परिवारेण सह सुखेन कालं **यापयति** ।

**खञ्जनपरिवारः, केचन, ईर्ष्या, उड्डयनम्, अर्पयति ।**

LM854V

**कर्त्तृपदानि-** वटवृक्षः, शावकः, खञ्जनमाता, शुकः, व्याधः

**क्रियापदानि-** निवसति, नयति, पारयामः, आगच्छतु, अर्पयति

**शब्दार्थः -**

खञ्जनपरिवारः - खञ्जरीटपक्षिपरिवारः (କଜଳପାତି ପରିବାର), पक्षपातः - एकपक्षविचारः (ଏକ ପାଖିଆ ବିଚାର), पारयामः - समर्थाः भवामः (ସମର୍ଥ ହେବ), ईर्ष्या - असहिष्णुता (ଅସହିଷ୍ଣୁତା), भीता - भयं प्राप्ता (ଭୟ ପାଇ), अर्पयति-समर्पणं करोति (ଦେଉଛି), व्यवस्थिता - व्यवस्थायुक्ता (ଠିକ୍‌ଠାକ୍) ।

## अभ्यास:

१. **एकपदेन उत्तरं कुरुत - (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)**

(क) वटकोटरे क: निवसति ?

(ख) खञ्जनमातु: मनसि किम् आगच्छति ?

(ग) व्याध: केन शुकस्य बन्धनं करोति ?

(घ) का व्यवस्थिता अस्ति ?

(ङ) अरण्ये क: अस्ति ?

(ईर्ष्या. सृष्टि:, खञ्जनपरिवार:, जालेन, वटवृक्ष:)

२. **शून्यस्थानं पूरयत - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) खञ्जनपरिवार: ..................... निवसति ।

(ख) ईश्वरस्य ..................... कीदृश: ?

(ग) परिवारसदस्या: ..................... भवेयु: ।

(घ) तस्या: मनसि ..................... आगच्छति ।

(ङ) ईश्वरस्य सृष्टि: ..................... अस्ति ।

(ईर्ष्या, व्यवस्थिता, पक्षपात:, सानन्दम्, सुवर्णवर्णा:)

३. **मातृभाषया अनुवादं कुरुत - (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)**

(क) खञ्जनमाता तस्मै प्रतिदिनं भोजनं ददाति ।

(ख) कोकिलस्य स्वर इव मम स्वर: नास्ति ।

(ग) शुकस्य यत् सौन्दर्यं तत् मयि नास्ति ।

(घ) अस्मिन् समये एक: सुन्दर: शुक: तत्र आगच्छत् ।

(ङ) जालेन शुकस्य बन्धनं करोति।

४. **रेखाङ्कितपदस्य संशोधनं कुरुत- (ରେଖାଙ୍କିତ ପଦକୁ ଠିକ୍ କର)**

(क) केचन सुन्दरा: <u>भवति</u> ।

(ख) एक: नूतन: शावक: जन्म नयन्ति ।

(ग) यदा वृक्षशाखायां खञ्जनमाता तं पश्यन्ति ।

(घ) सा ईश्वरस्य कृते धन्यवादम् अर्पयन्ति ।

(ङ) खञ्जनमातु: हीनभावना गच्छन्ति ।

५. **स्तम्भमेलनं कुरुत - (ସ୍ତମ୍ଭ ମିଳାଅ)**

| 'क' | 'ख' |
|---|---|
| सानन्दं | अस्ति |
| स्वर: | आगच्छति |
| वटवृक्ष: | भवन्ति |
| ईर्ष्या | नास्ति |
| तृप्तिं | निवसति |
| सुन्दरा: | जनयति |

६. **वाक्यानि रचयत - (ବାକ୍ୟ ରଚନା କର)**

निवसति, नास्ति, करोति, वदति, गच्छति

७. **सन्धिं कुरुत - (ସନ୍ଧିକର)**

स + आनन्दम्, न + अस्ति, उत् + डयनम्, तत् + क्षणम्

८. **शुद्धपदं रचयत - (ଶୁଦ୍ଧପଦ ରଚନା କର)**

रो क ति, वे म् भ य, च न के, नि ति स व, ले जा न

९. **विचित्रा सृष्टि: इति विषयस्य सारं निजभाषया संक्षेपेण लिषत**

(ବିଚିତ୍ରା ସୃଷ୍ଟି ବିଷୟର ସାର ନିଜଭାଷାରେ ସଂକ୍ଷେପରେ ଲେଖ)

## **तव कृते करणीयम्** (ତୁମପାଇଁ କାମ)

१. **उच्चैः पठत** - (ବଡ଼ପାଟିରେ ପଢ଼)

**वर्त्तमानकालः - लट्-लकारः**

**प्रथमपुरुषः**

| | **एकवचनम्** | | **द्विवचनम्** | | **बहुवचनम्** |
|---|---|---|---|---|---|
| **बालकः** / **बालिका** / **मित्रम्** | (गम्) - गच्छति | **बालकौ** / **बालिके** / **मित्रे** | गच्छतः | **बालकाः** / **बालिकाः** / **मित्राणि** | गच्छन्ति |
| | (पठ्) - पठति | | पठतः | | पठन्ति |
| | (हस्) - हसति | | हसतः | | हसन्ति |
| | (भू) - भवति | | भवतः | | भवन्ति |
| | (कृ) - करोति | | कुरुतः | | कुर्वन्ति |
| | (दृश्) - पश्यति | | पश्यतः | | पश्यन्ति |
| | (नी) - नयति | | नयतः | | नयन्ति |
| | (अस्) - अस्ति | | स्तः | | सन्ति |
| | (स्था) - तिष्ठति | | तिष्ठतः | | तिष्ठन्ति |
| | (दा) - ददाति | | दत्तः | | ददति |
| | (ज्ञा) - जानाति | | जानीतः | | जानन्ति |

**मध्यमपुरुषः**

| | **त्वम्** | **युवाम्** | **यूयम्** |
|---|---|---|---|
| (गम्) | गच्छसि | गच्छथः | गच्छथ |
| (पठ्) | पठसि | पठथः | पठथ |
| (हस्) | हससि | हसथः | हसथ |
| (भू) | भवसि | भवथः | भवथ |
| (कृ) | करोषि | कुरुथः | कुरुथ |
| (दृश्) | पश्यसि | पश्यथः | पश्यथ |
| (नी) | नयसि | नयथः | नयथ |
| (अस्) | असि | स्थः | स्थ |

| त्वम् | युवाम् | यूयम् |
|---|---|---|
| (स्था) - तिष्ठसि | तिष्ठथः | तिष्ठथ |
| (दा) - ददासि | दत्थः | दत्थ |
| (ज्ञा) - जानासि | जानीथः | जानीथ |

**उत्तमपुरुषः**

| अहम् | आवाम् | वयम् |
|---|---|---|
| (गम्) - गच्छामि | गच्छावः | गच्छामः |
| (पठ्) - पठामि | पठावः | पठामः |
| (हस्) - हसामि | हसावः | हसामः |
| (भू) - भवामि | भवावः | भवामः |
| (कृ) - करोमि | कुर्वः | कुर्मः |
| (दृश्) - पश्यामि | पश्यावः | पश्यामः |
| (नी) - नयामि | नयावः | नयामः |
| (अस्) - अस्मि | स्वः | स्मः |
| (स्था) - तिष्ठामि | तिष्ठावः | तिष्ठामः |
| (दा) - ददामि | दद्वः | दद्मः |
| (ज्ञा) - जानामि | जानीवः | जानीमः |

२. **उदाहरणानुसारं शून्यस्थानं पूरयत -** (ଉଦାହରଣ ଅନୁଯାୟୀ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

| | | |
|---|---|---|
| उदा - मृगः धावति । | मृगौ धावतः । | मृगाः धावन्ति । |
| (क) कोकिलः कूजति । | ...................... | ...................... |
| (ख) कृषकः कर्षति । | ...................... | ...................... |
| (ग) सिंहः गर्जति। | ...................... | ...................... |

•

# जीवनस्य रहस्यम्



कश्चन आम्रवृक्षः । तस्य वृक्षस्य शाखायाम् एकं सूत्रं लम्बमानम् **आसीत्** । तस्मिन् सूत्रे एकः कोकिलः बद्धः । बहुयत्नेन अपि तस्मात् सः मुक्तः न **अभवत्** ।

सूत्रेण बद्धं तं कोकिलं केचन काकाः **अपश्यन्** । ते कोकिलं विनाशयितुं तत्पराः **अभवन्** । क्रमेण काकाः तस्य समीपम् **आगच्छन्** । चञ्चूद्वारा कोकिलम् **अपीडयन्** । काकानां पीडया सः क्षताक्तः अभवत् । सूत्रबन्धनेन सः दुःखितः **आसीत्** । तन्मध्ये काकानां पीडा अधिकं दुःखम् **अददात्** ।

तस्मिन् एव काले एकः विशालः काकः तत्र **आगच्छत्** । सः कोकिलस्य उपरि आक्रमणम् **अकरोत्** । अयं काकः कालरूपः आसीत् । स्वजीवनस्य रक्षणे असमर्थः कोकिलः ''अहं नूनं मृत्युं प्राप्स्यामि'' इति **अचिन्तयत्** ।

एतत् सर्वं तस्य वृक्षस्य अधः स्थितः एकः सज्जनः **अपश्यत्** । सः मनसि एवं चिन्तितवान् यत् ''कोकिलः नूनं मरिष्यति'' इति । ''भो भगवन् ! भवान् निष्करुणः भवति ? निष्पापं कोकिलं किमर्थं न रक्षति ?''

तस्मिन् एव काले काकस्य कोकिलस्य च भारम् असहमानं तत् सूत्रं छिन्नम् अभवत् । सूत्रबन्धनात् मुक्तः कोकिलः शीघ्रम् उड्डीय दूरम् **अगच्छत्** ।

तदा सः सज्जनः सानन्दम् **अवदत्** - साधु, भगवन् ! मृत्युरूपेण आगतः काकः कोकिलस्य मोचनाय **अभवत्** । धन्या भवतः माया ।

| **कश्चन, सूत्रम्, बद्धः, मुक्तः, तत्पराः, क्षताक्तः, सज्जनः, नूनम्, छिन्नम्, माया** |
|---|

**कर्त्तृपदानि-** आम्रवृक्षः, सूत्रम्, कोकिलः, काकाः, सज्जनः

**क्रियापदानि-** अपश्यन्, अभवन्, अपीड़यन्, अददात्, अचिन्तयत्

LMH16I

**शब्दार्थः -**

समीपम् - निकटम् (ନିକଟରେ), विशालः काकः - डामरा काउ इति भाषायाम् - (ଡାମରା କାଉ), कालरूपः - मृत्युरूपः (ମୃତ୍ୟୁରୂପୀ), लम्बमानम् - लम्बितम् (ଲମ୍ବିଥିବା), अधः - तले / निम्नभागे (ତଳେ), मनसि - मानसे, हृदये (ମନରେ), निष्पापम् - पापरहितम् (ପାପଶୂନ୍ୟ), उड्डीय - उड्डयनं कृत्वा (ଉଡ଼ି), असहमानम् - सहने असमर्थम् (ସହିପାରୁନଥିବା), निष्करुणः - करुणारहितः (ନିର୍ଦ୍ଦୟ) ।

## - अभ्यासः -

१. **एकपदेन उत्तरं कुरुत -** (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)

(क) वृक्षशाखायां किं लम्बमानम् आसीत् ?

(ख) तस्मिन् सूत्रे कः बद्धः अभवत् ?

(ग) के कोकिलं विनाशयितुं तत्पराः अभवन् ?

(घ) वृक्षस्य अधः कः स्थितः ?

(ङ) काकः कस्य मोचनाय अभवत् ?

(कोकिलः, सज्जनः, सूत्रम्, काकाः, कोकिलस्य)

२. **शून्यस्थानं पूरयत -** (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) तस्मिन् सूत्रे एकः कोकिलः बद्धः .................. ।

(ख) सूत्रेण बद्धं तं कोकिलं केचन काकाः .................. ।

(ग) काकाः तस्य समीपम् .................. ।

(घ) चञ्चूद्वारा कोकिलम् .................. ।

(ङ) सूत्रबन्धनेन सः दुःखितः .................. ।

(च) सः कोकिलस्य उपरि आक्रमणम् .................. ।

(छ) अहं नूनं मृत्युम् प्राप्स्यामि इति .................. ।

(अचिन्तयत्, अकरोत्, अभवत्, अपीडयन्, अपश्यन्, आगच्छन्, आसीत्)

३. **मातृभाषया अनुवादं कुरुत-** (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

(क) बहुयत्नेन अपि तस्मात् सः मुक्तः न अभवत् ।

(ख) ते कोकिलं विनाशयितुं तत्परा: अभवन् ।

(ग) काकानां पीडया स: क्षताक्त: अभवत् ।

(घ) तन्मध्ये काकानां पीडा अधिकं दु:खम् अददात् ।

(ङ) स: कोकिलस्य उपरि आक्रमणम् अकरोत् ।

(च) मृत्युरूपेण आगत: काक: कोकिलस्य मोचनाय अभवत् ।

४. **स्तम्भमेलनं कुरुत** (ସ୍ତମ୍ଭ ମିଳାଅ)

| 'क' | 'ख' |
|---|---|
| लम्बमानम् | काका: |
| कोकिल: | सज्जन: |
| केचन | सूत्रम् |
| विशाल: | उपरि |
| एक: | बद्ध: |
| कोकिलस्य | काक: |

५. **वाक्यानि रचयत** - (ବାକ୍ୟରଚନା କର)

अभवत्, अगच्छत्, आसीत्, अददात्, चिन्तितवान्

६. **सन्धिविच्छेदं कुरुत** - (ସନ୍ଧିବିଚ୍ଛେଦ କର)

कश्चन, क्षताक्त:, सज्जन:, तत्परा:

७. **रेखाङ्कितपदस्य संशोधनं कुरुत** - (ରେଖାଙ୍କିତ ପଦକୁ ଠିକ କର)

(क) काका: अपश्यत्

(ख) स: मुक्त: अभवन्

(ग) एकं सूत्र: लम्बमानम् आसीत्

(घ) सज्जन: सानन्दम् अवदन्

(ङ) काक: कोकिलस्य मोचनम् अभवत्

८. ''जीवनस्य रहस्यम्'' विषयस्य सारं निजभाषया लिखत

'ଜୀବନସ୍ୟ ରହସ୍ୟମ୍' - ବିଷୟର ସାରକଥା ନିଜଭାଷାରେ ଲେଖ।

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)

- **उच्चैः पठत - (ବଡ଼ପାଟିରେ ପଢ଼)**

**लङ्लकार:- अतीतकाल:**

| | | | |
|---|---|---|---|
| **पठ्-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: अपठत् | त्वम् अपठ: | अहम् अपठम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अपठताम् | युवाम् अपठतम् | आवाम् अपठाव |
| **बहुवचनम्-** | ते/ता:/बालका: अपठन् | यूयम् अपठत | वयम् अपठाम |
| **भू-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: अभवत् | त्वम् अभव: | अहम् अभवम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अभवताम् | युवाम् अभवतम् | आवाम् अभवाव |
| **बहुवचनम्-** | ते/ता:/बालका: अभवन् | यूयम् अभवत | वयम् अभवाम |
| **अस्-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: आसीत् | त्वम् आसी: | अहम् आसम् |
| **द्विवचनम्-** | तौ/ते/बालकौ आस्ताम् | युवाम् आस्तम् | आवाम् आस्व |
| **बहुवचनम्-** | ते/ता:/बालका: आसन् | यूयम् आस्त | वयम् आस्म |
| **नी-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: अनयत् | त्वम् अनय: | अहम् अनयम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अनयताम् | युवाम् अनयतम् | आवाम् अनयाव |
| **बहुवचनम्-** | ते/ता:/बालका: अनयन् | यूयम् अनयत | वयम् अनयाम |
| **गम्-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
| **एकवचनम्-** | स:/सा/बालक: अगच्छत् | त्वम् अगच्छ: | अहम् अगच्छम् |
| **द्विवचनम्-** | तौ/ते/बालकौ अगच्छताम् | युवाम् अगच्छतम् | आवाम् अगच्छाव |
| **बहुवचनम्-** | ते/ता:/बालका: अगच्छन् | यूयम् अगच्छत | वयम् अगच्छाम |

●

# सेवा हि परमो धर्म :

एकदा इटालीदेशे युद्धस्य घोरगर्जनं श्रुतम् । अष्ट्रियाफ्रान्सदेशयोः मध्ये महासंग्रामः संघटितः । युद्धे अनेके सैन्याः आहताः। आहताः सैनिकाः जलं **देहि**, **रक्ष रक्ष** इति चीत्कारं कृतवन्तः । तेषाम् आर्त्तनादः मर्मभेदी आसीत् । एतत् करुणं दृश्यं दृष्ट्वा कश्चित् युवव्यापारी अतीव दुःखितः । पीडितानां प्राणरक्षार्थं सः सहसा समीपस्थं पार्वत्यग्रामं गतवान् । ग्राम्ययुवकान् उक्तवान् - भोः ! **आगच्छत** । आहतानां सेवां **कुरुत**, सैनिकानां प्राणान् **रक्षत** । युवकस्य अनुनयेन ग्राम्ययुवकाः उद्‌बुद्धाः सेवाकार्ये नियोजिताः । युवकद्वारा तत्रैव आहतसैनिकसेवासंस्था घटिता । सः युवकः आसीत् हेनेरी डुनाण्टः ।

हेनेरी स्विजरलाण्डस्य जेनेभा जनपदे १८२८मिते संवत्सरे 'मे' मासस्य अष्टमदिवसे जातः । तस्य माता धार्मिकी, समाजसेविका चासीत् । तया हेनेरी बाल्यात् प्रभावितः । निष्कामसेवा ईश्वरप्राप्तेः सरलः मार्गः इति तस्य धारणा जाता । सः लोकसेवानिमित्तं सेवासंस्थां स्थापितवान् । अधुना सा 'रेड्क्रसनाम्ना' विश्वे परिव्याप्ता । रेड्क्रससंस्थायाः जनकः आसीत् हेनेरी डुनाण्टः ।



विद्यालयेषु कनिष्ठरेड्क्रससंस्था कार्य्यं करोति । रेड्क्रसद्वारा छात्राः सेवाकार्ये प्रवृत्ताः । स्वास्थ्यं, सेवा, सौहार्द्यम् इति रेड्क्रससंस्थायाः लक्ष्यत्रयं भवति । एतेन विश्वशान्तिः सम्भविष्यति । अतः हेनेरी महाभागस्य आह्वानम् आसीत्- सुस्थाः **भवत** । जनसेवां **कुरुत** । समदृष्ट्या **पश्यत**, बन्धुतां **वर्द्धयत** ।

सुमहत्सेवार्थम् एषः महामानवः १९०१मिते खीष्टाब्दे नोवेलशान्तिपुरस्कारं प्राप्तवान् । पुरस्कृतराशिं लोकसेवा-निमित्तं समर्पितवान् । निष्कामसेवायाः प्रवर्त्तकः डुनाण्टमहाभागः १९१० खीष्टाब्दे दिवं गतः । तस्य कृतिः- 'मानवसेवा हि माधवसेवा' इति विश्वजनं सततं स्मारयति ।

**महासंग्रामः, आर्त्तनादः, अनुनयेन, नियोजिताः, प्रवृत्ताः, सम्भविष्यति, समदृष्ट्या, प्रवर्त्तकः, दिवंगतः कृतिः**

LMQH86

**कर्त्तृपदानि-** महासंग्रामः, सैन्याः, आर्तनादः, ग्राम्ययुवकाः, विश्वशान्तिः

**क्रियापदानि-** कुरुत, रक्षत, पश्यत, वर्द्धयत, देहि

**शब्दार्थः -**

आर्त्तनादः - पीडितानां करुणस्वरः (କରୁଣ ଚିତ୍କାର), मर्मभेदी - हृदयविदारकः (ହୃଦୟ ବିଦାରକ), उद्‌बुद्धाः - प्रेरिताः (ଉତ୍ସାହିତ), कनिष्ठरेड्क्रससंस्था - Junior Redcross, संवत्सरे - वर्षे (ବର୍ଷରେ), सम्भविष्यति - सम्भवः भविष्यति (ସମ୍ଭବ ହେବ), दिवंगतः - मृतः (ପ୍ରାଣତ୍ୟାଗ କରିଥିଲେ), सततम् - अविरतम् (ସବୁବେଳେ),

वृत्तिः - कार्यम् (କାର୍ଯ୍ୟ) । **१८२८-** मिते अष्टाविंशत्यधिक-अष्टादशशात मिते। १९०१–एकाधिकनवदशशतमिते। १९१०- दशाधिकनवदशशतमिते

## - अभ्यासः -

१. **एकपदेन उत्तरं लिखत ।** (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)

(क) संग्रामे के आहताः ?

(ख) युवकस्य अनुरोधेन के उद्बुद्धाः ?

(ग) ईश्वरप्राप्तेः सरलः मार्गः कः ?

(घ) हेनेरी डुनाण्टः कदा दिवं गतः ?

(ङ) कः रेड्क्रससंस्थायाः प्रतिष्ठाता ?

२. **बन्धनीमध्यस्थयथार्थपदैः शून्यस्थानानि पूरयत ।** (ବନ୍ଧନୀମଧ୍ୟରୁ ଯଥାର୍ଥପଦ ବାଛି ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) त्वं जलं ____________ । (ददातु, देहि)

(ख) यूयं सैनिकानां प्राणान् ____________ । (रक्षत, रक्ष)

(ग) आर्त्तनादः मर्मभेदी ____________ । (आसीत्, आस्ताम्)

(घ) एका रेड्क्रससंस्था ____________ । (घटिता, घटितः)

(ङ) ____________ रेड्क्रससंस्थायाः प्रतिष्ठाता । (गोपबन्धुः, हेनेरी)

३. **मातृभाषया अनुवादं कुरुत ।** (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)

(क) युद्धे अनेके सैन्याः आहताः ।

(ख) तेषाम् आर्त्तनादः मर्मभेदी आसीत् ।

(ग) निष्कामसेवा ईश्वरप्राप्तेः सरलः मार्गः ।

(घ) एतेन विश्वशान्तिः सम्भविष्यति ।

(ङ) पुरस्कारराशिं लोकसेवार्थं समर्पितवान् ।

४. **शुद्धपदं रचयत ।** (ଶୁଦ୍ଧପଦରଚନା କର)

र र्ज घो न ग म्

क्र रे सं ड़ स्था स

वा त स र्पि म न्

वा ष्का से नि म

५. **स्तम्भमेलनं कुरुत ।** (ସ୍ତମ୍ଭମେଳନ କର)

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| प्राणान् | कुरुत |
| जनसेवां | धार्मिकी |
| मानवसेवा | रक्षत |
| सैन्याः | माधवसेवा |
| माता | आहताः |

६. **रेखाङ्कितपदस्य संशोधनं कुरुत ।** (ରେଖାଙ୍କିତ ପଦକୁ ଠିକ୍ କର)

(क) त्वं प्राणान् <u>रक्षतु</u> ।

(ख) तस्य आह्वानम् <u>आसन्</u> ।

(ग) <u>भवन्तः</u> तत्र आगच्छत ।

(घ) आहताः चीत्कारं <u>कृतवान्</u> ।

(ङ) <u>अनेकाः</u> सैन्याः मृताः ।

७. **क्रियापदानि विविच्य लिखत ।** (କ୍ରିୟାପଦ ବାଛି ଲେଖ)

चीत्कारः, देहि, एतेन, पश्यत, आगच्छत, भवन्तः, प्राप्तवान्, सैन्याः, आसीत्, वयम्

८. **वाक्यानि रचयत ।** (ବାକ୍ୟରଚନା କର)

देहि, रक्ष, भवत, पश्यत, वर्द्धयत, आगछत

९. **सन्धिविच्छेदं कुरुत ।** (ସନ୍ଧିବିଚ୍ଛେଦ କର)

अतीव, कश्चित्, तत्रैव, पुरस्कृतः, ख्रीष्टाब्दे

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)

**उच्चैः पठत, लिखत च।**

**(क) 'पठ्' धातोः लोट्लकाररूपाणि**

| | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|
| **एकवचनम्-** | पठतु | पठ | पठानि |
| **द्विवचनम्-** | पठताम् | पठतम् | पठाव |
| **बहुवचनम्-** | पठन्तु | पठत | पठाम |

**(ख)**

| **पुरुषः** | **एकवचनम्** | | **द्विवचनम्** | | **बहुवचनम्** | |
|---|---|---|---|---|---|---|
| **प्रथमपुरुषः** | भवान्/सः | पठतु | भवन्तौ/तौ | पठताम् | भवन्तः / ते | पठन्तु |
| **मध्यमपुरुषः** | त्वं | पठ | युवां | पठतम् | यूयं | पठत |
| **उत्तमपुरुषः** | अहं | पठानि | आवां | पठाव | वयं | पठाम |

**(ग) पठ् लट्लकारे प्रथमपुरुषे**

| | पठ[ति] | | पठ[तः] | | पठ[न्ति] |
|---|---|---|---|---|---|
| **लोट्लकारे** सः | पठ[तु] | तौ | पठ[ताम्] | ते | पठ[न्तु] |
| | क्रीड[तु] | | क्रीड़[ताम्] | | क्रीड़[न्तु] |
| | पश्य_____ | | पश्य_____ | | पश्य_____ |
| | स्मर_____ | | स्मर_____ | | स्मर_____ |
| | वद_____ | | वद_____ | | वद_____ |

**लट्लकारे मध्यमपुरुषे**

| | पठ[सि] | | पठ[थः] | | पठ[थ] |
|---|---|---|---|---|---|
| **लोट्लकारे** त्वं | पठ | युवां | पठ[तम्] | यूयं | पठ[त] |
| | क्रीड़ | | क्रीड़[तम्] | | क्रीड़[त] |
| | पश्य | | पश्यतम् | | पश्यत |
| | स्मर | | स्मर_____ | | स्मर_____ |
| | वद | | वद_____ | | वद_____ |

**लट्लकारे उत्तमपुरुषे**

| | | | | | |
|---|---|---|---|---|---|
| | पठा मि | | पठा वः | | पठा मः |

**लोट्लकारे**

| | | | | | |
|---|---|---|---|---|---|
| अहं | पठा नि | आवां | पठा व | वयं | पठा म |
| | क्रीड़ा ______ | | क्रीड़ा______ | | क्रीड़ा______ |
| | पश्या______ | | पश्या______ | | पश्या______ |
| | स्मरा णि | | स्मरा______ | | स्मरा______ |
| | वदा______ | | वदा______ | | वदा______ |

•

# लक्ष्यप्राप्ति:

कदाचित् मण्डूककुले एका प्रतियोगिता आयोजिता। य: स्तम्भस्य शिखरं सर्वादौ प्राप्नुयात् स: विजयी भवेत् इति सर्वे मण्डूका: स्थिरीकृतवन्त:।

प्रतियोगितायां भागं नेतुं बहवो मण्डूका: अग्रे आगतवन्त:। प्रतियोगितां द्रष्टुम् अपि असंख्या: मण्डूका: तत्र सम्मिलिता:। प्रतियोगिता आरब्धा। मण्डूका:स्तम्भस्य आरोहणं कृतवन्त:। दर्शका: मण्डूका: करताडनेन 'अरे'! 'अहो'! 'हो'! इत्यादिभि: शब्दै: प्रतियोगिनाम् उत्साहं वर्धयन्ति स्म। स्तम्भ: अत्युच्च: चिक्कण: च आसीत्। कतिपया: मण्डूका: चिन्तयन्ति स्म-'क:वा स्तम्भस्य आरोहणं कुर्यात्? य: अग्रे गच्छेत् स: नूनम् अध: पतेत्।

तथापि कतिपया: मण्डूका: आरोहणाय यत्नं कृतवन्त:, परन्तु अन्येषां मण्डूकानाम् उत्साहरहितं वचनं श्रुत्वा अध: पतितवन्त: । येषां मनोबलं दृढम् अस्ति ते पुनरपि आरोहणं कुर्वन्ति । तथापि कोऽपि मण्डूक: स्तम्भस्य पादमपि न आरूढवान् । विफला: मण्डूका: नैराश्यं प्राप्तवन्त: ।



एका मण्डूकमाता स्वकनिष्ठपुत्रम् उक्तवती- 'पुत्र ! त्वं स्तम्भस्य आरोहणं **कुर्या:** । आरोहणसमये कस्यापि वचनं न **शृणुया:** । बधिरत्वं **प्रदर्शये:** । नूनं सफल: **भवे:** । मातु: वचनेन पुत्र: स्तम्भस्य आरोहणाय अग्रे आगच्छत् । अल्पेन एव कालेन स: शिशु: स्तम्भस्य मध्यभागं प्राप्तवान् । तस्य आरोहणं दृष्ट्वा अन्ये विस्मिता: अवदन् 'अये ! **पते:** त्वम् । भो: ! किमर्थम् एतत् साहसं करोषि? तव प्रयास: व्यर्थ:' तथापि स: शिशु:मण्डूक: निरन्तरम् अग्रे अगच्छत्। अन्तत: गत्वा स: स्तम्भस्य अग्रभागम् अपि प्राप्तवान् ।

एतद् दृष्ट्वा सर्वे विस्मिता: अभवन् । ते अपृच्छन्-कथं त्वं स्तम्भस्य आरोहणे समर्थ: अभव:? स: धीरम् अवदत् यदि वयं गुरुजनानां वचनं शृणुयाम, मनसि एकाग्रतां धारयेम आत्मविश्वासं च दृढं कुर्याम तर्हि सफलताम् अवश्यं प्राप्नुयाम।

| **मण्डूका:, दर्शका:, करताडनेन, चिक्कण:, अध:, नैराश्यम्, निरन्तरम्, आरोढुम्** |
|---|

**कर्तृपदानि-** मण्डूका:, दर्शका:, मण्डूकमाता, पुत्र:, शिशु:, अन्ये, सर्वे, ते
**क्रियापदानि-** भवेत्, वर्द्धयन्ति, आसीत्, पतेत्, कुर्वन्ति, आगच्छत्, कुर्याम

**शब्दार्थः -**

शिखरम् - अग्रम् (ଅଗ୍ରଭାଗକୁ), पादम् - मूलभागम् (ମୂଳଭାଗ ବା ଏକ ଚତୁର୍ଥାଂଶ), चकिताः-विस्मिताः ଆଶ୍ଚର୍ଯ୍ୟାନ୍ୱିତ। प्रयासः-उद्यमः, परिश्रमः (ଚେଷ୍ଟା, ପରିଶ୍ରମ)

## अभ्यास :

१. **एकपदेन उत्तरं लिखत (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)**

(क) मण्डूककुले का आयोजिता ?

(ख) मण्डूकाः कस्य आरोहणं कृतवन्तः ?

(ग) का आरब्धा ?

(घ) मण्डूकमाता कम् उक्तवती ?

(ङ) वयं केषां वचनं शृणुयाम ?

(गुरुजनानां, प्रतियोगिता, स्वकनिष्ठपुत्रम्, प्रतियोगिता, स्तम्भस्य)

२. **बन्धनीमध्यस्थयथार्थपदैः शून्यस्थानानि पूरयत । (ବନ୍ଧନୀମଧ୍ୟରେ ଥିବା ଠିକ୍‌ପଦଦ୍ୱାରା ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) मण्डूकाः ____________ आरोहणं कृतवन्तः।

(ख) स्तम्भः ____________ आसीत्।

(ग) पुत्र !त्वं स्तम्भस्य ____________ कुर्याः।

(घ) आरोहणसमये कस्यापि वचनं न ____________ ।

(ङ) अये ! ____________ त्वम् ?

(अत्युच्चः, आरोहणं, पतेः, शृणुयाः, स्तम्भस्य)

३. **मातृभाषया अनुवादं कुरुत । (ମାତୃଭାଷାରେ ଅନୁବାଦ କର)**

(क) सः शिशुः स्तम्भस्य मध्यभागं प्राप्तवान् ।

(ख) तव प्रयासः व्यर्थः ।

(ग) आरोहणसमये कस्यापि वचनं न शृणुयाः ।

(घ) कथं त्वं स्तम्भस्य आरोहणे समर्थः अभवः ?

(ङ) वयं गुरुजनानां वचनं शृणुयाम।

४.  **विषयानुसारं स्तम्भमेलनं कुरुत ।** (ବିଷୟ ଅନୁସାରେ ସ୍ତମ୍ଭମେଳନ କର)

| **'क' स्तम्भ** | **'ख' स्तम्भ** |
|---|---|
| स्तम्भस्य | दृढम् |
| आरोहणं | व्यर्थः |
| मण्डूकाः | शिखरम् |
| प्रयासः | चिन्तयन्ति |
| मनोबलं | कृतवन्तः |

५.  **रेखाङ्कितपदानां संशोधनं कुरुत।** (ରେଖାଙ୍କିତ ପଦଗୁଡ଼ିକର ସଂଶୋଧନ କର)

(क) <u>एकः</u> प्रतियोगिता आयोजिता।

(ख) कतिपयाः मण्डूकाः <u>चिन्तयति</u> स्म।

(ग) विफलाः <u>मण्डूकः</u> नैराश्यं प्राप्तवन्तः।

(घ) शिशुः <u>अवदन्</u>।

(ङ) <u>मने</u> एकाग्रतां धारयेम।

६.  **वाक्यानि रचयत।** (ବାକ୍ୟ ରଚନା କର)

मण्डूकाः, शृणुयाः, दृढम्, उक्तवती, आसीत्

७.  **शुद्धपदं रचयत।** (ଶୁଦ୍ଧପଦ ଲେଖ)

**यथा** - वा न् प्रा प्त = प्राप्तवान्

(क) ति गि प्र यो ता =

(ख) ना ज गु नां रु =

(ग) काः द र्श =

(घ) आ ह ण रो म् =

(ङ) स ताः म्मि लि =

८.  **सन्धिविच्छेदं कुरुत** (ସନ୍ଧିବିଚ୍ଛେଦ କର)

(क) सर्वादौ

(ख) प्राप्नुयात्

(ग) सम्मिलिताः

(घ) इत्यादिभिः

(ङ) अत्युच्चः

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)

१. उच्चैः पठत, लिखत च।

**विधिलिङ्-लकारः**

| उदाहरणम्- | | | प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|---|---|---|
| एकवचनम् | (पठ्) | - | सः/सा / बालकः पठेत् | त्वं पठेः | अहं पठेयम् |
| | (हस्) | - | ............... | ............... | .............. |
| | (गम्) | - | ............... | ............... | .............. |
| | (भ्रम्) | - | ............... | ............... | .............. |
| | (खेल्) | - | ............... | ............... | .............. |
| | (कृ) | - | ............... | ............... | .............. |
| द्विवचनम् | पठ् | - | तौ/ते/बालकौ पठेताम् | युवां-पठेतम् | आवां-पठेव |
| | (हस्) | - | ............... | ............... | .............. |
| | (गम्) | - | ............... | ............... | .............. |
| | (भ्रम्) | - | ............... | ............... | .............. |
| | (खेल्) | - | ............... | ............... | .............. |
| | (कृ) | - | ............... | ............... | .............. |
| बहुवचनम् | | - | ते/ताः/बालकाः पठेयुः | यूयं पठेत | वयं पठेम |
| | (हस्) | - | ............... | ............... | .............. |
| | (गम्) | - | ............... | ............... | .............. |
| | (भ्रम्) | - | ............... | ............... | .............. |
| | (खेल्) | - | ............... | ............... | .............. |
| | (कृ) | - | ............... | ............... | .............. |

•

# मातृभक्तः चाणक्यः

(शिशु-चाणक्यस्य मात्रा सह सम्भाषणम्)



चाणक्यः - मातः ! त्वं क्रन्दसि ?

माता - आम् पुत्र ! तव सौभाग्यं दृष्ट्वा क्रन्दामि ।

चाणक्यः - कीदृशं सौभाग्यम् ?

माता - तव हस्तेन मगधस्य निर्माणं **भविष्यति** ।

चाणक्यः - किन्तु मातः ! अहं किं **करिष्यामि ?**

माता - पुत्र ! त्वं मगधस्य प्रधानामात्यः **भविष्यसि** ।

चाणक्यः - मातः ! त्वम् एतत् कथं ज्ञातवती ?

माता - (दर्पणं प्रदर्श्य) पश्य पुत्र ! तव सम्मुखदन्ते सौभाग्यस्य चिह्नम् अस्ति ।

चाणक्यः - किन्तु मातः ! एषः तु आनन्दस्य विषयः । त्वं किमर्थं क्रन्दसि ?

माता - अरे ! समाजे एवं दृश्यते । यदा जनाः ज्येष्ठाः श्रेष्ठाः च भवन्ति, तदा निजलोकान् न पृच्छन्ति । विस्मरन्ति एव । तथैव त्वं मां **विस्मरिष्यसि** । एषा हि मम दुश्चिन्ता । (इति कथयित्वा दुःखं प्रकटितवती)

चाणक्यः - 'एवं वा ?' तर्हि पश्य (इति कथयन् बालः चाणक्यः प्रस्तरेण दन्तम् उत्पाटितवान् । क्षणेन एव मातुः दुःखं दूरीकृतवान् । एतत् दृष्ट्वा माता आश्चर्यान्विता अभवत् । तस्याः नेत्राभ्यां लोतकबिन्दवः निर्गताः ।)

माता - ''पुत्र ! तव हस्तेन मातृभूमेः मङ्गलं **भविष्यति** । देशस्य इतिहासे तव नाम **स्थास्यति** । लोकाः त्वां सर्वदा **स्मरिष्यन्ति** । एतद् मम आशीर्वचनम्।

कालान्तरे एषः चाणक्यः कौटिल्यरूपेण ख्यातः अभवत् । सः राजनीति - शास्त्राणि अर्थशास्त्राणि च संस्कृतेन रचितवान्, नन्दवंशस्य विलोपं च कृतवान् । चन्द्रगुप्तस्य हस्ते शासनभारम् अर्पितवान् । सः रामायणस्य वाक्यम् उद्घोषितवान् -

**कर्तृपदानि-** चाणक्यः, माता, चिह्नम्, विषयः, जनाः,

**क्रियापदानि-** क्रन्दसि, भविष्यसि, विस्मरिष्यसि, स्थास्यति, स्मरिष्यन्ति

**''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।''**

**सौभाग्यम्, प्रधानामात्य:, कथयन्, दन्तम्, क्षणेन, गरीयसी**

सौभाग्यम् - उत्तमभाग्यम् - (ଉତ୍ତମଭାଗ୍ୟ), ज्ञातवती - अवगतवती (ଜାଣିଲା), विस्मरिष्यसि - विस्मरणं करिष्यसि (ଭୁଲିଯିବୁ), उत्पाटितवान्- उत्पाटनं कृतवान् - (ଉପାଡ଼ିଦେଲେ), रचितवान् - लिखितवान् (ଲେଖିଲେ) ।

## अभ्यास:

१. **उचितेन पदेन शून्यस्थानं पूरयत ।** **(ଉଚିତପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)**

(क) तव हस्तेन मगधस्य निर्माणं ___________ ।

(ख) किन्तु मात: ! अहं किं ___________ ?

(ग) त्वं मगधस्य प्रधानामात्य: ___________ ।

(घ) लोका: त्वां सर्वदा ___________ ।

(ङ) देशस्य इतिहासे तव नाम ___________ ।

(च) ___________ जन्मभूमिश्च स्वर्गादपि गरीयसी ।

(भविष्यति, जननी, स्थास्यति, स्मरिष्यन्ति, भविष्यसि, करिष्यामि)

२. **मातृभाषया अनुवादं कुरुत ।** **(ମାତୃଭାଷାରେ ଅନୁବାଦ କର)**

(क) तव हस्तेन मगधस्य निर्माणं भविष्यति ।

(ख) तव सम्मुखदन्ते सौभाग्यस्य चिह्नम् अस्ति ।

(ग) त्वं किमर्थं क्रन्दसि ?

(घ) तथैव त्वं मां विस्मरिष्यसि ।

(ङ) तस्या: नेत्राभ्यां लोतकबिन्दव: निर्गता: ।

(च) चाणक्य: कौटिल्यरूपेण ख्यात: अभवत् ।

३. **शुद्धपदं रचयत।** (ଶୁଦ୍ଧପଦ ରଚନା କର)

यथा - म ध ग स्य - मगधस्य

(क) क क्षु स्य भि - ....................

(ख) मा स प्त म् - ....................

(ग) र म्प रा प - ....................

(घ) क्य: ण चा - ....................

(ङ) हा से इ ति - ....................

४. **सन्धिं कुरुत** (ସନ୍ଧିକର)

प्रधान + अमात्य:, किम् + अर्थम्, स्वर्गात् + अपि, आश्चर्य + अन्विता, नि: + गता:, दु: + चिन्ता

५. **वाक्यानि रचयत** (ବାକ୍ୟରଚନା କର)

भविष्यति, करिष्यामि, स्मरिष्यन्ति, स्थास्यति, विस्मरिष्यसि

## तव कृते करणीयम् (ତୁମପାଇଁ କାମ)

**उच्चै: पठत, लिखत च।** (ପାଟିକରି ପଢ଼ ଓ ଲେଖ)

**लृट्लकार: (भविष्यत्काल:)**

| **उदाहरणम्-** | **प्रथमपुरुष:** | **मध्यमपुरुष:** | **उत्तमपुरुष:** |
|---|---|---|---|
| **एकवचनम् (पठ्) -** | **स:/सा/बालक:/बालिका पठिष्यति** | **त्वं पठिष्यसि** | **अहं पठिष्यामि** |

**शून्यस्थानं पूरयत**

| | | | |
|---|---|---|---|
| (हस्) - | ................. | ................. | ................. |
| (गम्) - | ................. | ................. | ................. |
| (भ्रम्) - | ................. | ................. | ................. |
| (खेल्) - | खेलिष्यति | ................. | ................. |
| (कृ) - | करिष्यति | ................. | ................. |

**द्विवचनम्** - **तौ/ते/बालकौ/बालिके पठिष्यतः** **युवां पठिष्यथः** **आवां पठिष्यावः**

**शून्यस्थानं पूरयत**

(हस्) - ................ ................ ................

(गम्) - ................ ................ ................

(भ्रम्) - ................ ................ ................

(खेल्) - ................ ................ ................

(कृ) - ................ ................ ................

**बहुवचनम्** - **ते/ताः/बालकाः/बालिकाः पठिष्यन्ति** **यूयं पठिष्यथ** **वयं पठिष्यामः**

**शून्यस्थानं पूरयत**

(हस्) - ................ ................ ................

(गम्) - ................ ................ ................

(भ्रम्) - ................ ................ ................

(खेल्) - ................ ................ ................

(कृ) - ................ ................ ................

**<u>दृश्-धातुः</u>**

**शून्यस्थानं पूरयत**

| | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|
| **एकवचनम्** - | बालकः द्रक्ष्यति | त्वं ............... | अहं द्रक्ष्यामि |
| **द्विवचनम्** - | बालकौ ............... | युवां द्रक्ष्यथः | आवां ............... |
| **बहुवचनम्** - | बालकाः द्रक्ष्यन्ति | यूयं ............... | वयं द्रक्ष्यामः |

**<u>कृ-धातु</u>**

| | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|
| **एकवचनम्** - | करिष्यति | ............... | करिष्यामि |
| **द्विवचनम्** - | करिष्यतः | करिष्यथः | ............... |
| **बहुवचनम्** - | ............... | करिष्यथ | करिष्यामः |

**<u>स्था-धातुः</u>**

| | प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|---|
| **एकवचनम्-** | स्थास्यति | ............... | स्थास्यामि |
| **द्विवचनम्-** | स्थास्यतः | स्थास्यथः | ............... |
| **बहुवचनम्-** | ............... | स्थास्यथ | स्थास्यामः |

**<u>नी-धातुः</u>**

| | प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|---|
| **एकवचनम्-** | नेष्यति | नेष्यसि | नेष्यामि |
| **द्विवचनम्-** | ............... | नेष्यथः | ............... |
| **बहुवचनम्-** | नेष्यन्ति | .............. | नेष्यामः |

●

# नीतिमञ्जरी

(संस्कृतसाहित्यं नीतिरत्नावलीभिः समृद्धम् । शृङ्खलितमानवसमाजसंघटनाय महात्मानः नीतिश्लोकान् विरचितवन्तः । छात्राणां चरित्रनिर्माणाय नीतिकाराणां कतिचित् श्लोकाः अत्रोपस्थापिताः ।)

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।**
**चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशोबलम् ।।१।।**

यः पूज्यान् गुरुजनान् प्रणमति, सर्वदा वयोज्येष्ठान् प्रति सेवापरायणः भवति । तेषाम् आशीर्वादात् प्रणमतः जनस्य चत्वारि वर्द्धन्ते । सः दीर्घायुः, विद्वान्, यशस्वी, शक्तिमान् च भवति ।

**सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनः ।**
**सर्पो दशति कालेन दुर्जनस्तु पदे पदे ।।२।।**

सर्पः भयप्रदः खलः अपि मारात्मकः । परन्तु सर्पखलयोर्मध्ये सर्पः दुर्जनात् श्रेयस्करः । यतः सर्पः मनुष्यं सकृत् दशति । मन्दबुद्धिः दुर्जनस्तु वारं वारम् अनिष्टं करोति ।

**श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।**
**न हि प्रतीक्षते मृत्युः कृतमद्य न वा कृतम् ।।३।।**

बुद्धिमान् नरः आगामिदिनस्य कार्यम् अद्य एव करोति । अपराह्णस्य कार्यं पूर्वाह्णे सम्पादयति । कार्यं समाप्तम् असमाप्तं वा भवतु, मृत्युः महाकालः कमपि न अपेक्षते ।

**गते शोकं न कुर्वीत भविष्यं नैव चिन्तयेत् ।**
**वर्त्तमानेषु कालेषु वर्त्तयन्ति विचक्षणाः ।।४।।**

विगतः विषयः न चिन्तनीयः । भविष्यकाले किं भविष्यति, तदपि न चिन्तयेत् । विज्ञाः जनाः वर्त्तमानघटनाविषये एव चिन्तयन्ति, कार्यं कुर्वन्ति च ।

**अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।**
**तृणैरारभ्यते रज्जुः तया नागोऽपि बध्यते ।।५।।**

अल्पानि अपि वस्तूनि यदि मिलितानि भवन्ति, तर्हि तैः महत् कार्यं साधितं भवति । तृणानि यदि पृथक् सन्ति, तानि दुर्बलानि भवन्ति । परन्तु यदि तानि एकत्र कृत्वा मनुष्यः रज्जुरूपेण व्यवहरति, तया रज्ज्वा महाबलस्य गजस्य अपि बन्धनं कर्त्तुं शक्यते ।

**गुणवज्जनसम्पर्कात् याति स्वल्पोऽपि गौरवम् ।**
**पुष्पमालानुषङ्गेण तृणं शिरसि धार्यते ।।६।।**

नीचः जनः गुणिजनस्य संसर्गात् गौरवान्वितः भवति । तुच्छम् अपि तृणं पुष्पमालया सह देवतायाः मस्तके स्थानं प्राप्नोति ।

**पञ्चैव पूजयन् लोके यशः प्राप्नोति केवलम् ।**
**देवान् पितृन् मानुष्यांश्च गुरूनतिथिपञ्चमान् ।।७।।**

संसारे पञ्च एव पूज्याः भवन्ति । ते देवाः, पितृपुरुषाः, सज्जनाः, गुरुजनाः, अतिथयः च सन्ति । एतान् पूजयित्वा नरः यशस्वी भवति ।

| |
|---|
| **धार्यते, प्राप्नोति, दशति, प्रतीक्षते, वर्त्तयन्ति, विचक्षणा, संहतिः, आरभ्यते, बध्यते, नागोऽपि** |

**शब्दार्थः -**

१. अभिवादनशीलस्य - गुरुजनान् प्रति प्रणामं कुर्वतः ପ୍ରଣାମ କରୁଥିବା । नित्यं - सर्वदा ସବୁବେଳେ । वृद्धोपसेविनः- पूज्यानां वयोज्येष्ठानां सेवापरायणस्य जनस्य ବୟୋଜ୍ୟେଷ୍ଠ ବ୍ୟକ୍ତିଙ୍କଠାରେ ସେବାରତ ଲୋକର । आयुः - आयुष्यम् ଆୟୁଷ । विद्या-ज्ञानम् - ଜ୍ଞାନ । यशः - कीर्त्तिः କୀର୍ତ୍ତି । बलम् - आत्मबलम् ଆତ୍ମବଳ/ ମନୋବଳ । चत्वारि - चतुर्विधानि ଚାରିଗୋଟି, वर्धन्ते - वृद्धिप्राप्तानि भवन्ति ବଢ଼େ ।

२. सर्पदुर्जनयोर्मध्ये - सर्पदुष्टयोः मध्ये - ସାପ ଓ ଦୁର୍ଜନ ମଧ୍ୟରେ, वरं - श्रेयस्करः ଅପେକ୍ଷାକୃତ ଭଲ । सर्पः - विषधरः - भुजगः ସାପ । दशति - दंशनं करोति କାମୁଡ଼େ । कालेन - समयक्रमेण सकृत् वा ଥରେ । पदे पदे - प्रतिपदं / प्रतिक्षेत्रम् ପ୍ରତିକ୍ଷେତ୍ରରେ ।

३. श्वः - आगामिदिने ଆସନ୍ତାକାଲି । कार्यं - करणीयं कर्म କରିବା କାମ, अद्य - अधुना, अस्मिन् दिने ଆଜି, कुर्वीत - कुर्यात् କରିବା ଉଚିତ । पूर्वाह्णे - मध्याह्नस्य पूर्वकाले ଦିନର ପୂର୍ବ ଭାଗରେ । आपराह्णिकं - मध्याह्नस्य परस्मिन् काले कर्त्तव्यं कर्म ଅପରାହ୍ଣର କର୍ତ୍ତବ୍ୟ କାର୍ଯ୍ୟ । प्रतीक्षते - अपेक्षां करोति ଅପେକ୍ଷା କରେ । मृत्युः - मरणं / यमः ମୃତ୍ୟୁ, कृतमद्य - अद्य समाप्तम् ଆଜି ସମ୍ପାଦିତ । न वा कृतम् - सम्पादितं न वा भवतु ହେଉ ବା ନହେଉ ।

४. गते - घटितकार्ये / अतीते ଅତୀତରେ । शोकं - दु:खं ଦୁଃଖ । न कुर्वीत - न कुर्यात् - କରିବା ଅନୁଚିତ, भविष्यम् - भविष्यन्तं विषयं ଭବିଷ୍ୟତ ବିଷୟ, न चिन्तयेत् - चिन्तां न कुर्यात् ଚିନ୍ତା କରିବା ଉଚିତ୍, ନୁହେଁ । वर्त्तमानेषु कालेषु - साम्प्रतिक समये ବର୍ତ୍ତମାନ ସମୟରେ , वर्त्तयन्ति - प्रतिभान्ति, कर्मतत्परा: भवन्ति କର୍ମ ତତ୍ପର ହୁଅନ୍ତି । विचक्षणा: - बुद्धिमन्त: पुरुषा: ବୁଦ୍ଧିମାନ ଲୋକେ ।

५. अल्पानां - क्षीणानाम् ଅଳ୍ପ, वस्तूनां - द्रव्याणाम् ଦ୍ରବ୍ୟ, संहति: - मेल: / ऐक्यम् ଏକତା, कार्यसाधिका - लक्ष्यसफलकारिणी ଲକ୍ଷ୍ୟ ସଫଳ, तृणै: - घासादिभि: ଘାସାଦି ତୃଣଦ୍ୱାରା, आरभ्यते - आरम्भ: भवति ଆରମ୍ଭ ହୁଏ । रज्जु: - तृणादितन्तुविशेष: ଦଉଡ଼ି । तया - रज्ज्वा ଦଉଡ଼ିରେ, नागोऽपि - गजोऽपि ହାତୀ ମଧ୍ୟ, बध्यते - बन्धनप्राप्त: भवति ବନ୍ଧାହୁଏ ।

६. गुणवज्जनसम्पर्कात् - गुणिजनस्य महत: संसर्गात् ଗୁଣୀର ସମ୍ପର୍କରେ, याति - प्राप्नोति ଲାଭକରେ, स्वल्पोऽपि- नीचजनोऽपि ନୀଚମଧ୍ୟ, गौरवं - यश: प्रतिष्ठाम् ପ୍ରତିଷ୍ଠା, पुष्पमालानुषंगेण - पुष्पमालाया: साहचर्येण ଫୁଲମାଳ ସଙ୍ଗରେ, तृणं - तुच्छ: तृणविशेष: ତୃଣମଧ୍ୟ, शिरसि - देवताया: मस्तके ଦେବତାଙ୍କ ମୁଣ୍ଡରେ, धार्यते- धारणं क्रियते ଶୋଭାପାଏ ।

७. पञ्चैव - पञ्चविधान् एव ପାଞ୍ଚ ପ୍ରକାରର, पूजयन् - पूजां कुर्वन् ପୂଜା କରି, लोके - संसारे ସମାଜରେ, यश:- कीर्त्तिम् ଯଶ, प्राप्नोति - लाभं करोति ଲାଭ କରେ, देवान् - देवता: ଦେବତାଙ୍କୁ, पितृ न् - पितृपुरुषान् ପିତୃପୁରୁଷଙ୍କୁ, मनुष्यान् च - पूज्यान् जनान्, गुरून् - गुरुजनान् ଗୁରୁଜନଙ୍କୁ, अतिथिपञ्चमान् - पञ्चमपूज्यरूपेण उपस्थितान् आगन्तुकान् ପଞ୍ଚମରେ ଅତିଥିଙ୍କୁ ।

## अभ्यास:

१. **एकेन पदेन उत्तरं लिखत । (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)**

(क) वृद्धोपसेविन: कानि वर्धन्ते ?

(ख) क: न प्रतीक्षते ?

(ग) नागः कया बध्यते ?

(घ) तृणं कुत्र धार्यते ?

(ङ) सर्पदुर्जनयोः कः श्रेयस्करः ?

(च) किं न चिन्तयेत् ?

(छ) रज्जुः कैः आरभ्यते ?

(मृत्युः, शिरसि, आयुर्विद्यायशोबलम्, रज्ज्वा, भविष्यम्, सर्पः, तृणैः)

२. **स्तम्भमेलनं कुरुत** (ସ୍ତମ୍ଭମିଳାଅ)

| (क) | (ख) |
|---|---|
| चत्वारि | न कुर्वीत |
| सर्पः | प्राप्नोति |
| शोकं | बध्यते |
| यशः | दशति |
| नागः | वर्द्धन्ते |

३. **यथाक्रमं लिखत** । (କ୍ରମାନୁସାରେ ସଜାଇ ଲେଖ)

(क) पूर्वाह्णे कार्यमद्य श्वः कुर्वीत चापराह्णिकम् ।

(ख) वरं सर्पदुर्जनयोः दुर्जनः सर्पो मध्ये न ।

(ग) बध्यते तृणैरारभ्यते नागोऽपि रज्जुः तया ।

(घ) पूजयन् यशः केवलं प्राप्नोति लोके पञ्चैव ।

(ङ) न गते नैव भविष्यं शोकं चिन्तयेत् कुर्वीत ।

४. **बन्धनीमध्यस्थयथार्थपदेन शून्यस्थानं पूरयत** । (ବନ୍ଧନୀମଧ୍ୟରୁ ଠିକ୍ ପଦ ବାଛି ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) सर्पो __________ कालेन । (दशति, दिशति)

(ख) भविष्यं __________ चिन्तयेत् । (नैव, चैव)

(ग) तृणं __________ धार्यते । (शिरसि, मनसि)

(घ) श्वः कार्यमद्य __________ । (कुर्वन्ति, कुर्वीत)

(ङ) __________ प्राप्नोति केवलम् । (नाशं, यशः)

५. **मातृभाषया अर्थं लिखत** । (ମାତୃଭାଷାରେ ଅର୍ଥଲେଖ)

संहतिः, दशति, वर्त्तयन्ति, नागः, प्रतीक्षते

६. **सन्धिविच्छेदं कुरुत** । (ସନ୍ଧିବିଚ୍ଛେଦ କର)

कार्यमद्य, नैव, चापराह्णिकम्, नागोऽपि, अल्पानामपि, पञ्चैव, दुर्जनस्तु, तृणैरारभ्यते

७. **वाक्यानि रचयत** ।(ବାକ୍ୟ ରଚନା କର)

नित्यम्, सर्पः, तृणम्, याति, दशति

८. **क्रियापदानां चयनं कुरुत** ।(କ୍ରିୟାପଦଗୁଡ଼ିକୁ ବାଛ)

तया, प्रतीक्षते, चत्वारि, बध्यते, कुर्वीत, भवेत्, संहतिः,

**तव कृते करणीयम्** (ତୁମପାଇଁ କାମ)

ବିଭିନ୍ନ ନୀତିଶ୍ଳୋକ ସଂଗ୍ରହ କରି ମୁଖସ୍ଥ କର।

•

# सूक्तय:

**आत्मन: प्रतिकूलानि परेषां न समाचरेत् ।।१।।**

यत् निजकृते अनुकूलं न भवति, तत् अन्येषां कृते कदापि न करणीयम् ।

**अङ्गार: शतधौतेन मलिनत्वं न मुञ्चति ।।२।।**

अङ्गारस्य कृष्णरूपं शतवारं प्रक्षालनेन अपि न दूरीभवति, अस्यार्थो भवति सहजात: दुर्गुण: कथमपि न दूरीभवति ।

**उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।३।।**

उदारहृदया: जना: समग्रं विश्वं स्वपरिवारवत् चिन्तयन्ति ।

**हंसो हि क्षीरमादत्ते तन्मिश्राद् वर्जयत्यप: ।।४।।**

यथा हंस: क्षीरस्य नीरस्य च मिश्रणात् नीरं विहाय सारं क्षीरं गृह्णाति, तथैव विज्ञा: केवलं सारतत्त्वं गृह्णन्ति ।

**दीर्घदर्शी सदा च स्यात् चिरकारी भवेन्नहि ।।५।।**

दूरदृष्ट्या कार्यं कुर्य्यात् । परन्तु दीर्घसूत्री न भवेत् ।

## तव कृते करणीयम् (ତୁମ ପାଇଁ କାମ)

**ବିଭିନ୍ନ ସୂକ୍ତି ସଂଗ୍ରହକରି ମୁଖସ୍ଥକର।**

**शब्दार्थ: -**

प्रतिकूलानि - विपरीतभावान् (ବିପରୀତଭାବ), परेषां - अन्येषां, शत्रूणाम् (ଶତ୍ରୁମାନଙ୍କର) । शतधौतेन - बहुवारपरिमार्जनेन (ବହୁତ ଧୋଇଲେ ମଧ୍ୟ) । मलिनत्वम् - कालिमा (ମଳି) । न मुञ्चति - न त्यजति (ଛାଡ଼େ ନାହିଁ) । कुटुम्बकम् - कुटुम्बम्/ परिवार: (ପରିବାର) । आदत्ते - ग्रहणं करोति (ଗ୍ରହଣ କରେ) । वर्जयति - त्यजति (ଛାଡ଼େ) । अप: - जलानि (ପାଣି) । दीर्घदर्शी - दूरदर्शी (ଦୂରଦ୍ରଷ୍ଟା) । चिरकारी - दीर्घसूत्री / विलम्बी (ବିଳମ୍ବୀ) ।

## अभ्यास :

१. **शून्यस्थानानि पूरयत ।** (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

(क) आत्मनः __________ कूलानि परेषां न __________ समाचेरत् ।

(ख) __________ शतधौतेन मलिनत्वं न मुञ्चति ।

(ग) हंसो हि __________ आदत्ते तन्मिश्राद् वर्जयत्यपः ।

(घ) __________ सदा च स्यात् चिरकारी भवेत् नहि।

(ङ) उदारचरितानां __________ वसुधैव कुटुम्बकम् ।

२. **एकेन पदेन उत्तरं लिखत ।** (ଗୋଟିଏ ପଦରେ ଉତ୍ତର ଲେଖ)

(क) शतधौतेन कः मलिनत्वं न मुञ्चति ?

(ख) कः क्षीरमादत्ते ?

(ग) वसुधा केषां कुटुम्बकम् ?

(घ) कीदृशः न भवेत्?

(ङ) परेषां किं न समाचरेत् ?

(अङ्गारः, प्रतिकूलानि, हंसः, चिरकारी, उदारचरितानाम्)

३. **सन्धिं कुरुत ।** (ସନ୍ଧିକର)

वर्जयति + अपः, वसुधा + एव, क्षीरम् + आदत्ते, भवेत् + न

४. **अर्थं लिखत ।** (ଅର୍ଥଲେଖ)

मुञ्चति, आदत्ते, अपः, चिरकारी, परेषाम्

५. **वाक्यानि रचयत** (ବାକ୍ୟରଚନା କର)

भवेत्, हि, मुञ्चति, हंसः, सदा

६. **स्तम्भमेलनं कुरुत** (ସ୍ତମ୍ଭମିଳାଅ)

| 'क' | 'ख' |
|---|---|
| प्रतिकूलानि | न मुञ्चति |
| वसुधैव | क्षीरम् |
| मलिनत्वम् | कुटुम्बकम् |
| हंसः | न समाचरेत् |

●